3

अथ नामिके-

अजन्तपुँल्लिङ्गः ।

अर्थवदधातुरप्रत्ययः प्रातिपदिकम् ॥ १।२।४५ ॥

धातुं प्रत्ययं प्रत्ययान्तञ्च वर्जयित्वाऽर्थवच्छब्दस्वरूपं प्रातिपदिकसंज्ञम् ॥

कृत्तद्धितसमासाश्च ॥१।२।४६ ॥

कृदन्तस्तद्धितान्तस्समासश्च प्रातिपदिकसंज्ञः ॥

ङ्याप्प्रातिपदिकात् ॥ ४।१।१ ॥

अधिकारोऽयमापञ्चमाध्यायसमाप्तेः ॥

स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् ॥ ४।१।२ ॥

ङ्यन्तादाबन्तात्प्रातिपदिकाच्च परे स्वादयः प्रत्ययाः । सु, औ, जस् । इति प्रथमा । अम्, औट्, शस् । इति द्वितीया । टा, भ्याम्, भिस् । इति तृतीया । ङे, भ्याम्, भ्यस् । इति चतुर्थी ।

ङसि, भ्याम्, भ्यस् । इति पञ्चमी । ङस्, ओस्, आम्, । इति षष्ठी । ङि, ओस्, सुप् । इति सप्तमी । सुपः ॥ १।४।१०२ ॥

सुपस्त्रीणि त्रीणि प्रत्येकमेकवचनादिसंज्ञानि । सु, इत्येकवचनम् । औ, इति द्विवचनम् । जस्, इति बहुवचनम् । एवं सर्वत्र ।

प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा ॥ २ । ३ । ४६ ॥

प्रातिपदिकार्थमात्रे लिङ्गमात्रे परिमाणमात्रे वचनमात्रे च प्रथमा । तत्र प्रथमायां प्राप्तायाम् ।

द्व्येकयोर्द्विवचनैकवचने ॥ १।४।२२ ॥

द्वित्वैकत्वयोर्द्विवचनैकवचने । एकत्वविवक्षायाम् । पुरुष—सु "उपदेश" इत्युकारस्येत्व "तस्यलोपः" इत्युलोपः । सुप्तिङन्तामिति पदत्वं ससजुषोरिति रुः । उकारस्येत्त्वलोपौ रस्य खरवसानयोरिति विसर्जनीयः । पुरुषः । द्वित्वविवक्षायां द्विवचनम् । पुरुष २ औ ।

सरूपाणामेकशेष एकविभक्तौ ॥ १।२।६४ ॥

समानायां विभक्तौ यानि सरूपाण्येव दृष्टानि । तेषां मध्ये एक एव शिष्यते । इत्येकशेषः । "आद्गुणः" इत्यस्यापवादेन "वृद्धिरेचि" इत्यनेन वृद्धौ प्राप्तायाम् ।

प्रथमयोः पूर्वसवर्णः ॥ ६।१।१०२ ॥

अकः प्रथमाद्वितीययोरचि पूर्वपरयोः पूर्वसवर्णदीर्घ एकादेशः । अनेन पूर्वसवर्णदीर्घे प्राप्ते ।

नादिचि ॥ ६।१।१०३ ॥

अवर्णादिचि न पूर्वसवर्णदीर्घः । वृद्धिरेचि । पुरुषौ ।

बहुषु बहुवचनम् ॥ १।४।२१॥

बहुत्वे बहुवचनम् । पुरुष ३ जस् । सरूपाणामित्येकशेषः

चुटू ॥१।३।७॥

प्रत्ययाद्यौ चुटू इतौ । पुरुष अस् । हलन्त्यमितीत्संज्ञाप्राप्तौ

विभक्तिश्च ॥१।४।१०३॥

सुप्तिङौ विभक्तिसंज्ञौ ।

न विभक्तौ तुस्माः ॥१।३।४॥

विभक्तिस्थास्तवर्गसकारमकारा इतो न । इति सस्य नेत्त्वम् । पुरुषाः ।

कर्मणि द्वितीया २।३।२॥

अनभिहिते कर्मणि द्वितीया । पुरुष अम् ।

१ कर्तुरीप्सिततमङ्कर्मेति कर्मत्वम् ।

अमि पूर्वः ॥६।१।१०६।

अकोऽम्यचि पूर्वपरयोः पूर्वरूपमेकादेशः । पुरुषम् । पुरुषौ । पुरुष =शस् ।

लशक्वतद्धिते ॥१।३।८॥

तद्धितभिन्नप्रत्ययाद्या लशकवर्गा इतः । पुरुषास् ।

तस्माच्छसो नः पुंसि ॥६।१।१०२॥

पूर्वसवर्णदीर्घाच्छसः सस्य नः पुंसि । पुरुषान् ।

कर्तृकरणयोस्तृतीया ॥२॥३।१८॥

अनभिहितयोः कर्तृकरणयोस्तृतीया । पुरुष—टा ।

यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् १।२।१३॥

यः प्रत्ययो यस्माद् विधीयते तदादि शब्दस्वरूपं तस्मिन्नङ्गसंज्ञम् ।

अङ्गस्य ॥६।४।१॥

इत्यधिकृत्य ।

टाङसिङसामिनात्स्याः ॥७।१।१२॥

अदन्तादङ्गात्परेषां टादीनामिनादयः । पुरुष इन । आद् गुणः । पुरुषेन ।

अट्कुप्वाङ्नुम्व्यवायेऽपि ॥८।४।२॥

(१)—साधकतमं करणमिति करणसंज्ञायाम् ।

अट्कुप्वाङ्नुम्व्यवायेऽपि रषाभ्यां परस्य नस्य ण एकपदे । पुरुषेण । पुरुष-भ्याम् ।

सुपि च ॥७।३।१०२॥

अदन्ताङ्गस्य दीर्घो यञादौ सुपि । पुरुषाभ्याम् । पुरुष-भिस् ।

अतो भिस ऐस् ॥७।१।९॥

अदन्तादङ्गात्परस्य भिस ऐस् । पुरुषैः ।

बहुलं छन्दसि ॥७।१।१०३

छन्दसि विषये भिस ऐस् बहुलम् । देवेभिर्मानुषे जने । देवैर्वा ।

चतुर्थी सम्प्रदाने ॥२।३।१३॥

अनुक्ते सम्प्रदाने चतुर्थी । पुरुष-ङे ।

ङेर्यः ॥ ७ । १ । १३ ॥

अदन्तादङ्गात्परस्य ङेर्यः । पुरुषाय । पुरुषाभ्याम् । पुरुष-भ्यस् ।

बहुवचने झल्येत् ॥७।३।१०॥

अदन्तस्याङ्गस्य एज् झलादौ बहुवचने सुपि । पुरुषेभ्यः ।

अपादाने पञ्चमी ॥२।३।२८॥

(१)-कर्मणा यमभिप्रैति स सम्प्रदानमिति सम्प्रदानसंज्ञायाम् ।

अमि पूर्वः ॥६।१।१०६।

अकोऽम्यचि पूर्वपरयोः पूर्वरूपमेकादेशः । पुरुषम् । पुरुषौ । पुरुष =शस् ।

लशक्वतद्धिते ॥१।३।८॥

तद्धितभिन्नप्रत्ययाद्या लशकवर्गा इतः । पुरुषास् ।

तस्माच्छसो नः पुंसि ॥६।१।१०२॥

पूर्वसवर्णदीर्घाच्छसः सस्य नः पुंसि । पुरुषान् ।

कर्तृकरणयोस्तृतीया ॥२।३।१८॥

अनभिहितयोः कर्तृकरणयोस्तृतीया । पुरुष-टा ।

यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् १।४।१३॥

यः प्रत्ययो यस्माद् विधीयते तदादि शब्दस्वरूपं तस्मिन्नङ्ग संज्ञम् ।

अङ्गस्य ॥६।४।१॥

इत्यधिकृत्य ।

टाङसिङसामिनात्स्याः ॥७।१।१२॥

अदन्तादङ्गात्परेषां टादीनामिनादयः । पुरुष इन । आद् गुणः । पुरुषेन ।

अट्कुप्वाङ्नुम्व्यवायेऽपि ॥८।४।२॥

(१)—साधकतमं करणमिति करणसंज्ञायाम् ।

अट्कुप्वाङ्नुम्व्यवायेऽपि ।८।४।२। अट्कवर्गपवर्गाङ्नुमां व्यवधानेऽपि रषाभ्यां परस्य नस्य ण एकपदे । पुरुषेण । पुरुष-भ्याम् ।

सुपि च ॥७।३।१०२॥

अदन्ताङ्गस्य दीर्घो यञादौ सुपि । पुरुषाभ्याम् । पुरुष-भिस् ।

अतो भिस ऐस् ॥७।१।९॥

अदन्तादङ्गात्परस्य भिस ऐस् । पुरुषैः ।

वहुलं छन्दसि ॥७।१।१०

छन्दसि विषये भिस ऐस् बहुलम् । देवेभिर्मानुषे जने । देवैर्वा ।

चतुर्थी सम्प्रदाने ॥२।३।१३॥

अनुक्ते सम्प्रदाने चतुर्थी । पुरुष-ङे ।

ङेर्यः ॥ ७ । १ । १३ ॥

अदन्तादङ्गात्परस्य ङेर्यः । पुरुषाय । पुरुषाभ्याम् । पुरुष-भ्यम् ।

बहुवचने झल्येत् ॥७।३।१०३॥

अदन्तस्याङ्गस्य एज् झलादौ बहुवचने सुपि । पुरुषेभ्यः ।

अपादाने पञ्चमी ॥२।३।२८॥

(१)-कर्मणा यमभिप्रैति स सम्प्रदानमिति सम्प्रदानसंज्ञायाम् ।

अनभिहितेऽपादाने पञ्चमी । पुरुषात् । पुरुषाभ्याम् । पुरुषेभ्यः ।

षष्ठी शेषे ॥ २ । ३ । ५० ॥

कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः शेषस्तत्र षष्ठी । पुरुषस्य । पुरुष–ओस् ।

ओसि च ॥ ७ । ३ । १०४ ॥

अदन्ताङ्गस्य एत् ओसि परे । पुरुषयोः । पुरुष–आम् ।

ह्रस्वनद्यापो नुट् ॥ ७ । १ । ५४ ॥

ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः । पुरुष–नाम् इतिस्थिते ।

नामि ॥ ६ । ४ । ३ ॥

नामि परेऽजन्ताङ्गस्य दीर्घः । पुरुषाणाम् । पुरुषे । पुरुषयोः । पुरुष–सु । एत्वे कृते ।

आदेशप्रत्यययोः ॥ ८ । ३ । ५९ ॥

इण्कुभ्यां परस्याऽपदान्तस्यादेशस्य प्रत्ययावयवस्य च सस्य मूर्धन्यादेशः । पुरुषेषु ।

---

(१)–ध्रुवमपायेऽपादानमिति अपादानसंज्ञायाम् ।
(२)–आधारोऽधिकरणमित्यधिकरणसंज्ञायां "सप्तम्यधिकरणे च" इति सप्तमी ।

सम्बोधने च ॥ २ । ३ । ४७ ॥

सम्बोधनमभिमुखीकरणम् । तत्र वर्तमानात्प्रातिपदिकात् प्रथमा । हे पुरुष—सु ।

एकवचनं सम्बुद्धिः ॥ २ । ३ । ४९ ॥

सम्बोधने प्रथमाया एकवचनं सम्बुद्धिसंज्ञम् ।

एङ्ह्रस्वात्सम्बुद्धेः ॥ ६ । १ । ६९ ॥

एङन्ताद्ध्रस्वान्ताच्चाङ्गाद्धल्लुप्यते सम्बुद्धेश्चेत् । हे पुरुष ! । हे पुरुषौ । हे पुरुषाः । एवं-राम, कृष्ण, देवादयोऽपि ज्ञेयाः ।

सर्वादीनि सर्वनामानि ॥ १ । १ । २७ ॥

सर्वादीनि सर्वनामसंज्ञानि । सर्वः । सर्वौ । सर्व—जस्

जसः शी ॥ ७ । १ । १७ ॥

अदन्तात्सर्वनाम्नो जसः शी । सर्वे ।

सर्वनाम्नः स्मै ॥ ७ । १ । १४ ॥

---

(१)-सर्व, विश्व, उभ, उभय, डतर, डतम, इतर, अन्य, अन्यतर, त्व, त्वत्, नेम, सम, सिम, पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थाया-मसंज्ञायाम्, स्वमज्ञातिधनाख्यायाम्, अन्तरम्बहिर्योगोपसंव्यानयोः, त्यद्, तद्, यद्, एतद्, इदम्, अदस्, एक, द्वि, युष्मद्, अस्मद्, भवतु, किम्, इतिसर्वादिगणः ।

अदन्तात्सर्वनाम्नः परस्य ङेः स्मै । सर्वस्मै ।

ङसिङ्योः स्मात्स्मिनौ ॥ ७ । १ ॥ १५ ॥

अदन्तात्सर्वनाम्नः परयोर्ङसिङ्योःस्मात्स्मिनौ । सर्वस्मात्

आमि सर्वनाम्नः सुट् ॥ ७ । १ । ५२ ॥

अवर्णान्तात्सर्वनाम्नः परस्यामः सुडागमः । एत्वषत्वे । सर्वेषाम् । सर्वस्मिन् । शेषं पुरुषवत् । एवं विश्वादयोऽप्यदन्ताः । सर्वादयश्च पञ्चत्रिंशद् गणे द्रष्टव्याः। उभशब्दो नित्यं द्विवचनान्तः। गणे पाठस्त्वकजर्थः[1] । उभकौ । उभौ २ । उभाभ्याम् ३ । उभयशब्दः सर्ववत् । उभय इत्यादि ।

पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् ॥ १ । १ । ३४ ॥

व्यवस्थायामसंज्ञायां पूर्वादीनि जसः कार्यम्प्रति विभाषा सर्वनामसंज्ञानि । पूर्वे । पूर्वाः । एवं परादयः । स्वाभिधेयापेक्षावधिनियमो[2] व्यवस्था । व्यवस्थायां किम् । उत्तरे प्रत्युत्तरे कुशलः । असंज्ञायां किम् । उत्तराः कुरवः ।

स्वमज्ञातिधनाख्यायाम् ॥ १ । १ । ३५ ॥

१—अव्ययसर्वनाम्नामकच्प्राक्टेरितिविहिताकजर्थ इत्यर्थः ।

२—अवधेर्नियमोऽवधिनियमः । स्वस्य पूर्वादिशब्दस्याभिधेयो वाच्योयोऽर्थस्तदपेक्षश्चासाववधिनियमश्चेतिविग्रहः ।

अज्ञातिधनाख्यायां स्वशब्दो जसः कार्यं प्रति वा सर्वनामसंज्ञः । स्वे । स्वाः । आत्मीया आत्मान इति वा । आख्याग्रहणादिह न निषेधः । स्वे पुत्राः । स्वाः पुत्राः । आत्मीया इत्यर्थः । अज्ञातीत्यादि किम् । स्वाः । ज्ञातयोऽर्था वा ।

अन्तरं बहिर्योगोपसंव्यानयोः ॥ १ । १ । ३६ ॥

बहिर्योगोपसंव्यानयोरन्तरशब्दो जसः कार्यम्प्रति वा सर्वनामसंज्ञः । अन्तरे, अन्तरा वा गृहाः । अन्तरे, अन्तरा वा शाटकाः । परिधानीया इत्यर्थः । (अपुरीति वक्तव्यम्) अन्तरायां पुरि वसति । (वाप्रकरणे तीयस्य ङित्सूपसंख्यानम्) द्वितीयस्मै । द्वितीयायेत्यादि ।

पूर्वादिभ्यो नवभ्यो वा ॥ ७ । १ । १६ ॥

पूर्वादिभ्यो नवभ्यो ङसिङ्योः स्मात्स्मिनौ वा । पूर्वस्मात् । पूर्वात् । पूर्वस्मिन् । पूर्वे । एवं परादीनामपि ।

न बहुव्रीहौ ॥ १ । १ । २९ ॥

बहुव्रीहौ कर्त्तव्ये सर्वनामसंज्ञा न । त्वकं पिता यस्य स त्वत्कपितृकः ।

१—अत्र बहुव्रीह्यर्थेऽलौकिकप्रक्रियावाक्ये सर्वनामसंज्ञानिषेधप्रवृत्तौ सर्वनामत्वाभावादकन्न, भाष्ये त्वन्तरङ्गत्वादकच्स्वरौ तु स्यातामेवेति खण्डितमिति, त्वत्कपितृक इत्येव । प्रियविश्वायेत्यादिषूपसर्जनत्वादेव निषेधः । बहुव्रीहावित्यनुवर्त्तमाने पुनर्बहुव्रीहिग्रहणादवयवभूतबहुव्रीहेः प्रतिषेधः । तेन वस्त्रान्तरा वसनान्तरा इत्यत्र विकल्पो न ।

तृतीयासमासे ॥ १ । १ । ३० ॥

तृतीयासमासे सर्वादीनि सर्वनामसंज्ञानि न । मासपूर्वाय ।

द्वन्द्वे च ॥ १ । १ । ३१ ॥

द्वन्द्वे सर्वनामसंज्ञा न । पूर्वापराधराणाम् । तदन्तविधिना भाषायाः समुदायस्य सर्वनामसंज्ञाया अयं निषेधः ।

विभाषा जसि ॥ १ । १ । ३२ ॥

द्वन्द्वे सर्वनामसंज्ञा वा जसि । वर्णाश्रमेतरे । वर्णाश्रमेतराः । जसः कार्यं प्रति विभाषा । तेनाऽकच् न । किन्तु क एव । वर्णाश्रमेतरकाः ।

प्रथमचरमतयाल्पार्धकतिपयनेमाश्च ॥ १।१।३३॥

प्रथमादयो जसः कार्यं प्रति वा सर्वनामसंज्ञाः । प्रथमे । प्रथमाः । चरमे । चरमाः । द्वितये । द्वितयाः । अल्पे । अल्पाः । अर्द्धे । अर्द्धाः । कतिपये । कतिपयाः । शेषं रामवत् । नेमे । नेमाः । शेषं सर्ववत् । जसः कार्यं प्रति विभाषेति स्वीकारादकज् न । प्रथमकाः । शब्दान्तर-त्वाच्छीभावो न । निर्जरः ।

जराया जरसन्यतरस्याम् ॥ ७ । २ । १०१ ॥

१—लक्षणप्रतिपदोक्तपरिभाषया पूर्वसदृशेतिसमासस्य ग्रहणात् त्वका कृतम्, त्वकत्कृतमित्यादौ निषेधो न ॥ तृतीयासमासार्थवाक्येऽप्रनिषेधार्थं पुनः समासग्रहणम्, तेन-मासेन पूर्वायेत्यपि सिद्धम् ।

(११ पृष्ठे, आकडारादेकासंज्ञेत्यतः पूर्वं पाठ्यमेतत्)

सुडनपुंसकस्य । १ । १ । ४३ ।

अनपुंसकस्य सुट् सर्वनामस्थानसंज्ञः ।

स्वादिष्वसर्वनामस्थाने । १ । ४ । १७ ।

कप्प्रत्ययावधिष्वसर्वनामस्थानेषु परेषु पूर्वं पदसंज्ञम् ।

यचि भम् । १ । ४ । १८ ।

यादिष्वजादिषु च कप्प्रत्ययावधिष्वसर्वनामस्थानेषु परेषु पूर्वं भसंज्ञम् ।

जराया जरस् वाऽजादौ विभक्तौ । पदाङ्गाधिकारे तस्य तदन्तस्य च ग्रहणम् । निर्दिश्यमानस्यादेशा भवन्तीति समुदायस्यैव । हस्वेऽनिर्दिश्यमानेऽपि एकदेशविकृतमनन्यवदिति जरशब्दस्याप्यादेशः । निर्जरसौ । निर्जरौ । निर्जरसः । निर्जराः । एवममाद्यजादिविभक्तिषु ।

पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु ॥ ६ । १ । ६३ ॥

पाद, दन्त, नासिका, मास, हृदय, निशा, असृज्, यूष, दोष, यकृत, शकृत, उदक, आस्य, एषां पदादयो वा स्युश्शस्प्रभृतिषु विभक्तिषु । पदः । पादान् । पदा । पादेनेत्यादि ।

आकडारादेका संज्ञा ॥ १ । ४ । १ ॥

"कडाराः कर्मधारये" इत्यतः प्रागेका संज्ञा, इत्यधिक्रियते । उभयोः सावकाशत्वे परैव स्यात् निरवकाशत्वे तु या निरव-

(१) ननु सूत्रेण जराशब्दस्य जरसादेशो विधीयते निर्जरशब्दस्तु तदन्त इत्यत आह-पदाङ्गेत्यादि, पदञ्चाङ्गञ्च पदाङ्गे तयोरधिकारे तस्य-सूत्रोपात्तस्य तदन्तस्य सूत्रोपात्तान्तस्य च ग्रहणम्भवतीति परिभाषार्थः-

(२) नन्वनेकाल्त्वात् सम्पूर्णस्य निर्जरशब्दस्य जरसादेशः कथन्नेत्यत आह-निर्दिश्यमानस्येति निर्दिश्यमानत्वञ्च षष्ठीप्रकृतित्वम्प्राथमिकोपस्थितिविषयत्वम्-

(३) कृत्कृत्यसंज्ञावदत्रापि समावेशे प्राप्ते नियमार्थं वचनम् ।

काशा सैव। तेन शसादावचि भसंज्ञैव न पदसंज्ञा। अतो जश्त्वं न। दतः। दता। जश्त्वम्। दद्भ्याम्। इत्यादि। मासः। मासा। रुत्वयत्वयलोपाः। माभ्याम्। माभिरित्यादि।

भस्य ॥ ६। ४। १२९॥

अधिकारोऽयमापादपरिसमाप्तेः।

अल्लोपोऽनः ॥ ६। ४। १३४ ॥

अन्नन्तस्य भस्यातो लोपः।

रषाभ्यां नो णः समानपदे ॥ ८। ४। १॥

रषाभ्यां परस्य नस्य ण एकपदे। यूष्णः यूष्णा।

नलोपः प्रातिपदिकान्तस्य ॥ ८। २। ७॥

प्रातिपदिकसंज्ञकं यत्पदन्तदन्तस्य नस्य लोपः। नलोपस्यासिद्धत्वाद्दीर्घत्वमेत्वमैस्त्वञ्च न। यूषभ्याम्। यूषभिः। यूषभ्यः। इत्यादि।

विभाषा ङिश्योः ॥ ६। ४। १३६॥

अन्नन्तस्यातो लोपो वा ङिश्योः। यूष्णि। यूषणि। पक्षे पुरुषवत्।

संख्याविसायपूर्वस्याह्नस्याऽहनन्यतरस्यां ङौ ॥ ६। ३। ११० ॥

संख्याविसायपूर्वस्याह्नस्याहन् वा स्यान्ङि परे । द्व्यह्नि । द्व्यहनि । द्व्यह्ने । विगतमहः, व्यह्नः । व्यह्नि । व्यहनि । व्यह्ने । सायाह्नि । सायाहनि । सायाह्ने । इत्यदन्ताः । विश्वपाः ।

दीर्घाज्जसि च ॥ ६ । १ । १०५ ॥

दीर्घाज्जसि इचि च न पूर्वसवर्णदीर्घः । वृद्धिः । विश्वपौ । सवर्णदीर्घः । विश्वपाः ।

आतो धातोः ॥ ६ । ४ । १४० ॥

आकारान्तो यो धातुस्तदन्तस्य भस्याङ्गस्य लोपः । अलोन्त्यस्य । विश्वपः । विश्वपाभ्यामित्यादि । एवं शङ्खध्मादयः । इत्यादन्ताः हरिः । प्रथमयोः पूर्वसवर्णः । हरी ।

जसि च ॥ ७ । ३ । १०९ ॥

ह्रस्वान्तस्याङ्गस्य गुणो जसि । हरयः ।

वा०—जसादिषु छन्दसि वा वचनं प्राङ् णौ चङ्युपधायाः । हरयः । हर्यः । "वा छन्दसी"ति वचनान्न पूर्वसवर्णदीर्घः ।

ह्रस्वस्य गुणः ॥ ७ । ३ । १०८ ॥

ह्रस्वान्तस्याङ्गस्य गुणः सम्बुद्धौ । एङ्ह्रस्वादिति सम्बुद्धिलोपः । हे हरे । हरिम् । हरी । हरीन् ।

शेषो घ्यसखि ॥ १ । ४ । ७ ॥

ह्रस्वौ यौ यू तदन्ते सखिभिन्नमनदीसंज्ञं घिसंज्ञम् ।

आङो नाऽस्त्रियाम् ॥ ७ । ३ । १२० ॥

घिसंज्ञकात्परस्याङो ना, न तु स्त्रियाम् । आङिति टासंज्ञा प्राचाम् । हरिणा ।

घेर्ङिति ॥ ७ । ३ । १११ ॥

घिसंज्ञकस्य गुणो ङिति सुपि । हरये । ङसिङसोर्घेर्ङितीति गुणे कृते–

ङसिङसोश्च ॥ ६ । १ । ११७ ॥

एङो ङसिङसोरति पूर्वपरयोः पूर्वरूपमेकादेशः । हरेः । हर्योः । हरीणाम् ।

अच्च घेः ॥ ७ । ३ । ११९ ॥

घिसंज्ञकाभ्यामिदुद्भ्यां परस्य ङेरौद्घेरत् । हरौ । हर्योः । हरिषु । एवं कव्यादयः ।

अनङ् सौ ॥ ७ । १ । ९३ ॥

सख्युरङ्गस्यानङादेशोऽसम्बुद्धौ सौ । ङिच्चेत्यन्तादेशः ।

अलोऽन्त्यात्पूर्व उपधा ॥ १ । १ । ६५ ॥

अन्त्यादलः पूर्वो वर्ण उपधासंज्ञः ।

सर्वनामस्थाने चासम्बुद्धौ ॥ ६ । ४ । ८ ॥

नान्तस्योपधाया दीर्घोऽसम्बुद्धौ सर्वनामस्थाने ।

अपृक्त एकाल्प्रत्ययः ॥ १।२।४१ ॥

एकाल्प्रत्ययो यः सोऽपृक्तसंज्ञः ।

हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् ॥ ६।१।६८॥

हलन्तात्परं, दीर्घौ यौ ङ्यापौ तदन्ताच्च परं स्वितसीत्येतदपृक्तं हल्लुप्यते । सखा । हे सखे ।

सख्युरसम्बुद्धौ ॥ ७।१।९२॥

सख्युरङ्गात्परं सम्बुद्धिवर्जं सर्वनामस्थानं णिद्वत् ।

अचो ञ्णिति ॥ ७।२।११५ ॥

अजन्ताङ्गस्य वृद्धिर्ञिति णिति च । सखायौ । सखायः । घिसंज्ञाभावान्न तत्कार्य्यम् । सख्या । सख्ये ।

ख्यत्यात्परस्य ॥ ६।१।११२॥

ख्य,त्य,शब्दाभ्यां ङसिङसोरत उत् । सख्युः [२] ॥

(१) शोभनः सखा सुसखा । सुसखायौ । सुसखायः । अनङ्णिद्भ्रावयोराङ्गत्वात्तदन्तेऽपि प्रवृत्तिः । समस्तस्य सखिरूपत्वाभावादसखीति निषेधाप्रवृत्तेर्घिसंज्ञा । सुसखिना । सुसखये, ङसिङसोर्गुणे कृते कृतयणादेशत्वाभावात् ख्यत्यादित्युत्वन्न । सुसखेः । सुसखौ, इत्यादि । सखमतिशयितः सखा अतिसखा । परमः सखा यस्येति विग्रहे । परमसखा, परमसखायावित्यादि । गौणत्वेऽप्यनङ्णित्वे प्रवर्तेते । सखामतिक्रान्तोऽति सखिः । लिङ्गविशिष्टपरिभाषाया अनित्यत्वान्न टच् । हरिवत्, इ, नङ्णित्वे न भवतः । गोस्त्रियोरिति ह्रस्वत्वेन सखिशब्दस्य लाक्षणिकत्वात् । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणादिति केचित् ।

(२) कृतयणौ खितिशब्दौ खीतीशब्दौ च गृह्येते ।

औत् ॥ ७ । ३ । ११८ ॥

इदुद्भ्यां परस्य ङेरौत् । सख्यौ । शेषं हरिवत् ।

पतिः समास एव ॥ १ । ४ । ८ ॥

पतिशब्दः समास एव घिसंज्ञः । पत्या । पत्ये । पत्युः २ । पत्यौ । शेषं हरिवत् । समासे तु भूपतिना । भूपतये । वेदे तु "षष्ठीयुक्तश्छन्दसि वे"ति वा घिसंज्ञा । भूतानां पतये । पत्येवा । कतिशब्दो नित्यं बहुवचनान्तः ।

बहुगणवतुडति संख्या ॥ १ । १ । २३ ॥

एते संख्यासंज्ञाः ।

डति च ॥ १ । १ । २५ ॥

डत्यन्ता संख्या षट्संज्ञा ।

प्रत्ययस्य लुक्श्लुलुपः ॥ १ । १ । ६१ ॥

लुक्श्लुलुप्शब्दैः कृतं प्रत्ययादर्शनं क्रमात्तत्तत्संज्ञम् ।

षड्भ्यो लुक् ॥ ७ । १ । २२ ॥

षड्भ्यः परयोर्जश्शसोर्लुक् ।

प्रत्ययलोपे प्रत्ययलक्षणम् ॥ १ । १ । ६२ ॥

प्रत्यये लुप्तेऽपि प्रत्ययाश्रयं कार्यम् । इति जसिचेति गुणे प्राप्ते-

न लुमताऽङ्गस्य ॥ १ । १ । ६३ ॥

लुमता शब्देन प्रत्ययलोपे तस्मिन्यदङ्गं तस्य यत्कार्य्यन्तन्न । कति २ । कतिभिः । कतिभ्यः २ । कतीनाम् । कतिषु । युष्मदस्मद्

षट्संज्ञकास्त्रिषु सरूपाः। त्रिशब्दो नित्यं बहुवचनान्तः । त्रयः । त्रीन् । त्रिभिः । त्रिभ्यः । त्रिभ्यः ।

त्रेस्त्रयः ॥ ७।१।५३॥

त्रिशब्दस्य त्रयादेश आमि । त्रयाणाम् । परमत्रयाणाम् । गौणत्वे तु नेति केचित् । प्रियत्रीणाम् । वस्तुतस्तु प्रियत्रयाणाम् । त्रिषु । द्विशब्दो नित्यं द्विवचनान्तः ।

त्यदादीनामः ॥ ७।२।१०२ ॥

त्यदादीनामः स्याद्विभक्तौ । (त्यदादीनां द्विपर्य्यन्तानामकारवचनम्) द्वौ२ । द्वाभ्याम् ३ । द्वयोः २ । द्वावतिक्रान्तोऽतिद्विः । हरिवत् । प्राधान्ये तु परमद्वौ इत्यादि । औडुलोमिः । औडुलोमी । (लोम्नोऽपत्येषु बहुष्वकारो वक्तव्यः) उडुलोमाः । बाह्वादीञोऽपवादः । इतीदन्ताः ।

वातप्रमीः। अमि पूर्वः । वातप्रमीम् । वातप्रम्यौ। वातप्रमीन् । वातप्रम्या । वातप्रमीभ्याम् ३ । वातप्रम्ये । वातप्रम्यः २ । वातप्रम्योः २ । वातप्रम्याम् । दीर्घत्वान्न नुट् । ङौ तु सवर्णदीर्घः । वातप्रमी । वातप्रमीषु । एवं ययीपप्यादयः । क्विबन्तवातप्रमीशब्दस्य तु आमि, शसि, ङौ च, विशेषः । वातप्रम्यम् । वातप्रम्यः। वातप्रम्यि । एरनेकाचइतिवक्ष्यमाणो यण् । शेषं प्रधीवत् ।

(१) यात्यनेन ययीर्मार्गः । पातिलोकमिति पपीः सूर्य्यः । यापोः किद्द्वेश्चेति ई प्रत्ययः ।

बह्व्यः श्रेयस्यो यस्य स बहुश्रेयसी। दीर्घङ्यन्तत्वाद्धल्ङ्याबि-ति सुलोपः।

यू स्त्र्याख्यौ नदी ॥ १।४।३ ॥

स्त्र्याख्यौ ईदूदन्तौ नदीसंज्ञौ। (प्रथमलिङ्गग्रहणञ्च)

अम्बार्थनद्योर्ह्रस्वः ॥ ७।३।१०७ ॥

अम्बार्थानां नदीसंज्ञकानाञ्च ह्रस्वः सम्बुद्धौ। हे बहुश्रेयसि। शसि- बहुश्रेयसीन्।

आण् नद्याः ॥ ७।३।११२ ॥

नद्यन्तात्परस्य ङित आडागमः।

आटश्च ॥ ६।१।९० ॥

आटोऽचि पूर्वपरयोर्वृद्धिरेकादेशः। बहुश्रेयस्यै। बहु... स्याः। नद्यन्तात्परत्वान्नुट्। बहुश्रेयसीनाम्।

ङेराम्नद्याम्नीभ्यः ॥ ७।३।११६ ॥

आबन्तान्नद्यन्तान्नीशब्दाच्च परस्य ङेराम्। बहुश्रेयस्याम्। शेषमीप्रत्ययान्तत्वात्प्रेयसीवत्। अङ्यन्तत्वान्न सुलोपः। अतिलक्ष्मीः शेषं बहुश्रेयसीवत्। कुमारीमिच्छन्कुमारीवाचरन्वा ब्राह्मणः कुमारी। क्यजन्ताद्वाचारक्विबन्ताद्वा कर्तरि क्विप्। हल्ङ्याबिति-सुलोपः॥

(१) प्रथमलिङ्गे यौ स्त्र्याख्यावीदूतौ तावपि नदीसंज्ञौ।

अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ॥ ६ । ४ । ७७ ॥

श्नुप्रत्ययान्तस्य इवर्णोवर्णान्तस्य धातोर्भ्रूइत्यस्य चाङ्गस्येयङुवङावजादौ प्रत्यये । ङिच्चेत्यन्तादेशः । आन्तर्यादेरियङ् । ओरुवङ् । इतीयङि प्राप्ते—

एरनेकाचोऽसंयोगपूर्वस्य ॥ ६ । ४ । ८२ ॥

धात्ववयवसंयोगपूर्वो न भवति य इवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यणजादौ प्रत्यये । इतियण् । कुमार्य्यौ । कुमार्य्यः । हे कुमारि । अमि शसि च-कुमारीम् । कुमारीः । कुमार्यै । कुमार्याः । कुमारीणाम् । कुमार्य्याम् ॥ प्रधीः । प्रध्यौ २ । प्रध्यः । प्रध्यम् । प्रध्यः ॥ ग्रामणीः । ग्रामण्यौ २ । ग्रामण्यः । शेषं प्रधीवत् । (गतिकारकेतरपूर्वपदस्य यण् नेष्यते) परमधियौ । इतीदन्ताः ॥

शम्भुर्हरिवत्साध्यः । शम्भुः । शम्भू । शम्भवः । शम्भुम् । शम्भू । शम्भून् । शम्भुना । शम्भुभ्याम् । शम्भुभिः । घेर्ङितीति गुणे । शम्भ-

(१) असंयोगपूर्वस्य किम् । सुश्रियौ । यवक्रियौ । अनेकाचः किम् । नीः । नियौ । ङेराम्नीतिआम् । नियाम् । शेषं सुधीवत् । सह खेन वर्ततइतिसखः, तमिच्छतीति सखीः । सख्यौ । ख्यत्यादितिदीर्घस्यापि ग्रहणादुकारः । सख्युः२ । सुखमिच्छतीति सुखीः । सुख्युः २ । सुतमिच्छतीति सुतीः । सुत्युः२ । तकारस्थानजयद्वर्णादपीष्यते । लूनमिच्छतीतिलूनीः । लून्युः२ । वेतिकेचित् । सख्यः । सुख्यः । सुत्यः । लून्यः । शेषं रूपमेषां प्रधीवदित्यादि ज्ञेयम् ॥

वे । शम्भुभ्याम् । शम्भुभ्यः । शम्भोः । शम्भुभ्याम् । शम्भुभ्यः । शम्भोः । शम्भ्वोः । शम्भूनाम् । शम्भौ । शम्भ्वोः । शम्भुषु । एवं विष्णुवायुभान्वादयः ।

तृज्वत् क्रोष्टुः ॥ ७ । १ । ९५ ॥

क्रोष्टुशब्दस्य तृजन्तवद्रूपं स्यादसम्बुद्धौ सर्वनामस्थाने ।

ऋदुशनस्पुरुदंशोऽनेहसां च ॥ ७ । १ । ९४ ॥

ऋदन्तानामुशनसादीनां चानङ् स्यादसम्बुद्धौ सौ । अनङि अन्तादेशे जाते, सुलोपः सर्वनामस्थाने चेत्युपधादीर्घः । नलोपः । क्रोष्टा । हे क्रोष्टो ।

ऋतो ङिसर्वनामस्थानयोः ॥ ७ । ३ । ११० ॥

ङौ सर्वनामस्थाने च ऋदन्तस्याङ्गस्य गुणः स्यात् । रपरत्वम् ।

अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम् ॥ ६ । ४ । ११ ॥

अबादीनामुपधाया दीर्घोऽसम्बुद्धौ सर्वनामस्थाने परे । क्रोष्टारौ । क्रोष्टारः । क्रोष्टारम् । क्रोष्टारौ । क्रोष्टून् ।

विभाषा तृतीयादिष्वचि । ७ । १ । ९७ ॥

तृतीयादावचि क्रोष्टुर्वा तृज्वत् । क्रोष्ट्रा । क्रोष्ट्रे ।

ऋत उत् ॥ ६ । १ । १११ ॥

ऋदन्तान्ङसिङसोरति परे पूर्वपरयोरुकार एकादेशः । रपरः ।

रात्सस्य ॥ ८ । २ । २४ ॥

रेफात्संयोगान्तस्य सकारस्यैव लोपो नान्यस्य । रेफस्य विसर्जनीयः । क्रोष्टुः । क्रोष्ट्रोः । आमि परत्वात्तृज्वद्भावे प्राप्ते । (नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन) क्रोष्टूनाम् । क्रोष्टरि । क्रोष्ट्रोः । पक्षे हलादौ च शम्भुवत् । इत्युदन्ताः । हूहूः । हूह्वौ । हूह्वः । इत्यादि वातप्रमीवत् । अतिचमूशब्दे तु नदीकार्य्यं विशेषः । हे अतिचमु । अतिचम्वै । अतिचम्वाः २ । अतिचमूनाम् । अतिचम्वाम् । खलपूः ।

ओः सुपि ॥ ६।४।८३ ॥

अनेकाचोऽङ्गस्य धातोरुवर्णस्य यण् स्यादचि सुपि धात्ववयवसंयोगपूर्वस्य तु न । खलप्वौ । खलप्वः । इत्यादि, प्रधीवत् । एवं सुल्वादयः । "न भूसुधियो"रिति न यण् । स्वभूः । स्वभुवौ । स्वभुवः । इत्यादि । सुधीवत् । एवं कटप्रूस्वयंभ्वादयः । वर्षाभूः ।

वर्षाभ्वश्च ॥ ६।४।८४ ॥

अस्य यण् स्यादचि सुपि । वर्षाभ्वौ । वर्षाभ्वः । वर्षाभ्वम् । वर्षाभ्वौ । वर्षाभ्वः । शेषं खलपूवत् । दृढं भवतीति दृन्भूः । (दृन्करपुनर्भ्वश्चेतिवक्तव्यम्)। दृन्भ्वौ । दृन्भ्वः । इत्यादि । एवं काराभूः । पुनर्भूः । इत्यूदन्ताः । धाता । ऋतोऽङीति गुणः । सोर्लोपः । रस्य विसर्गः । हे धातः । अप्तृन्निति दीर्घः । धातारौ । धातारः । धातारम् । धातारौ । सवर्ण-

(१) क्वचित् 'कर' इति पाठः क्वचित् 'कार' इति ।

दीर्घः। नत्वम्। धातॄन्। (ऋवर्णान्तस्य णत्वं वाच्यम्) धातॄणाम्। शेषं पूर्ववत्। एवं नप्तृहोतृपोत्रादयः। पिता। हे पितः। अतृंजन्तत्वादप्तृन्नित्युपधादीर्घो न। पितरौ। पितरः। पितरम्। पितरौ। शेषं धातृवत्। एवं जामातृभ्रात्रादयः।

नृ च ॥६।४।६॥

नृ इत्येतस्य नामि वा दीर्घः। नृणाम्। नृणाम्। शेषं पितृवत्।

गोतो णित् ॥ ७ । १ । ९ ॥

गोशब्दात्परं सर्वनामस्थानं णित्कार्यकृत्स्यात्। गौः। गावौ। गावः।

औतोऽम्शसोः ॥ ६ । १ । ९३ ॥

ओतोऽम्शसोः परतः पूर्वपरयोराकार एकादेशः स्यात्। गाम्। गावौ। गाः। गवा। गोभ्यामित्यादि। ङसिङसोश्चेति पूर्वरूप एकादेशः। गोः। इत्यादि।

रायो हलि ॥ ७ । २ । ८५ ॥

---

(१) एतदव्युत्पत्तिपक्षे ज्ञेयम्। व्युत्पत्तिपक्षे तु नप्त्रादिग्रहणं नियमार्थम्, उणादिनिष्पन्नानां तृन्तृजन्तानां चेदुपधादीर्घस्तर्हि नप्त्रादीनामेव, तेनेह न। पितरौ। पितरः। उद्गातृशब्दस्य तु भवत्येव। समर्थसूत्रे उद्गातार इति भाष्यप्रयोगात्।

(२) गोत इति तपरत्वमोकारान्तोपलक्षणार्थम्। यस्माद्वर्णनिर्देशे तपरत्वं प्रसिद्धम्। तेन सुद्यौः। सुद्यावौ। सुद्यावः। हे सुद्यौः। इत्यादि।

रैशब्दस्य आकारोऽन्तादेशः स्याद्धलि विभक्तौ । अचि आयादेशः । सुराः । सुरायौ । सुरायः । सुरायम् । सुरायौ । सुरायः । सुराया । सुराभ्यामित्यादि । ग्लौः । ग्लावौ । ग्लावः । इत्यादि ।

इत्यजन्ताः पुँल्लिङ्गाः ।

* अथाजन्ताः स्त्रीलिङ्गाः *

आबन्तात्स्वाद्युत्पत्तिः । हल्ङ्याबिति सुलोपः । रमा ।

औङ आपः ॥ ७ । १ । १८ ॥

आबन्तादङ्गात्परस्यौङः शी । औङित्यौकारविभक्तेः संज्ञा । रमे । रमाः ।

सम्बुद्धौ च ॥ ७ । ३ । १०६ ॥

आप एकारः सम्बुद्धौ । एङ्ह्रस्वादिति सम्बुद्धिलोपः । हे रमे २ । हे रमाः । रमाम् । रमे । रमाः । स्त्रीत्वान्नत्वाभावः ।

आङि चापः ॥ ७ । ३ । १०५ ॥

आङि ओसि च परे आबन्तस्याङ्गस्य एकारः । रमया । रमाभ्याम् । रमाभिः ।

याडापः ॥ ७ । ३ । ११३ ॥

आपः परस्य ङिद्वचनस्य याडागमः। वृद्धिः। रमायै। रमायाः २। रमयोः २। रमाणाम्। रमायाम्। रमासु। एवं दुर्गाम्बिकादयः।

सर्वनाम्नः स्याड्ढ्रस्वश्च ॥ ७। ३। ११४ ॥

आबन्तात्सर्वनाम्नः परस्य ङितःस्याट् स्याडापश्च ह्रस्वः। सर्वस्यै। सर्वस्याः। आमि सुट्। सर्वासाम्। सर्वस्याम्। शेषं रमावत्। एवं विश्वादय आबन्ताः।

विभाषा दिक्समासे बहुव्रीहौ ॥ १। १। २८ ॥

दिगुपदिष्टे बहुव्रीहौ सर्वनामता वा। उत्तरपूर्वस्यै। उत्तरपूर्वायै। अपुरीत्युक्तेर्नेह– अन्तरायै नगर्यै।

विभाषा द्वितीयातृतीयाभ्याम् ॥ ७। ३। ११५ ॥

आभ्यां ङितः स्याडापश्च ह्रस्वः। द्वितीयस्यै। द्वितीयायै। एवं तृतीया। अम्बार्थेति ह्रस्वः। हे अम्ब !। शेषं रमावत्। (डलकवतीनां न ह्रस्वः) हेअम्बाडे। हेअम्बाले। हे अम्बिके। जरा। हलि रमा वत्। अचि वा जरसादेशः। जरसौ। जरे। जरसः। जराः। इत्यादि "पद्दन्न" इति नासिकाया नस्। निशाया निश्। नसः। नसा। नोभ्यामित्यादि। निशः। निशा।

व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः ॥८। २। ३६॥

व्रश्चादीनां सप्तानां छशान्तयोश्चषकारोन्तादेशो झलि पदान्ते च। झलां जशोन्त इति जश्त्वम्। निड्भ्याम्। निड्भिः।

(मांसपृतनासानूनां मांसृपृत्स्नवो वाच्याः शसादौ वा) पृतनायाः पृत्। पृतः। पृता। पृद्भ्यामित्यादि। पक्षे सुटि च रमावत्। गौर्या विश्वपावत्। मतिर्हरिवत्। स्त्रीत्वाच्छसो नत्वाभावः। टाङ्त्वस्य न नात्वश्च। मतीः। मत्या॥

ङिति ह्रस्वश्च। १। ४। ६॥

इयङुवङ्स्थानौ नित्यस्त्रीलिङ्गौ ईदूतौ ह्रस्वौ च इवर्णौ स्त्रियां वा नदीसंज्ञौ ङिति परे न तु स्त्री। आण्नद्या इत्याट्। आटश्चेति वृद्धिः मत्यै। मतये। मत्याः२। मतेः२। मत्याम्। मतौ। एवं श्रुतिस्मृतिबुद्धिप्रभृतयः।

त्रिचतुरोः स्त्रियां तिसृचतसृ। ७। २। ९९॥

एतयोरेतावादेशौ स्त्रियां विभक्तौ।

अचि र ऋतः। ७। २। १००॥

तिसृचतसृ एतयोर्ऋकारस्य रेफादेशोऽचि। गुणदीर्घोत्वाना

(१) स्त्रियामिति त्रिचतुरोर्विशेषणं नाङ्गस्य तेन स्त्रियां गौणयोर्नैतावादेशौ। प्रियास्त्रयः, त्रीणि वा यस्य प्रियत्रिः। प्रियत्री। प्रियत्रयः। प्रियचत्वा इत्यादि। यदा स्त्रियां मुख्यौ लिङ्गान्तरे गौणे तदाऽऽदेशौ स्तएव। प्रियास्तिस्रो यस्य स प्रियतिसा। प्रियतिस्रौ। प्रियतिस्रः। प्रियतिस्रम्। शसि-प्रियतिस्रः। प्रियतिस्रा। प्रियतिस्रि क्लीबे प्रियतिसृ। प्रियतिसृणी, प्रियतिसृणि इत्यादि, एवं प्रियचतसा। प्रियचतस्रौ इत्यादि।

मपवादः । तिस्रः२ । तिसृभिः । तिसृभ्यः२ । आमि "नुमचिरे" ति नुडेव ।

न तिसृचतसृ ॥ ६ । ४ । ४ ॥

एतयोर्नामि दीर्घो न । तिसृणाम् । तिसृषु । द्वेरत्वे सत्याप ॥ द्वे२ । द्वाभ्याम्३ । द्वयोः२ । गौरी । "दीर्घाज्जसि चे"ति पूर्वसवर्णनिषेधः । गौर्यौ । गौर्यः ।

छन्दस्युभयथा ॥ ६ । ४ । ५ ॥

तिसृचतसृशब्दयोर्नामि वा दीर्घश्छन्दसि । तिसृणाम् । तिसृणाम् । चतसृणाम् । चतसृणाम् । गौरी । गौर्यौ । गौर्यः । हे गौरि । गौरीम् । गौर्यौ । गौरीः । गौर्या । गौरीभ्याम् ३ । गौरीभिः । गौर्यै । गौरीभ्यः २ । गौर्याः २ । गौर्योः २ । गौरीणाम् । गौर्याम् । गौरीषु । एवं वाणीनद्यादयः । लक्ष्मीः । अङ्यन्तत्वान्न सुलोपः । शेषं गौरीवत् । एवं तरीतन्त्र्यादयः । स्त्री । ङ्यन्तत्वात्सुलोपः । हे स्त्रि ।

स्त्रियाः ॥ ६ । ४ । ७९ ॥

स्त्रीशब्दस्येयङजादौ प्रत्यये । स्त्रियौ । स्त्रियः ।

वाऽम्शसोः ॥ ६ । ४ । ८० ॥

स्त्रीशब्दस्य अमि शसि च परे वा इयङ् । स्त्रियम् । स्त्रीम् ।

स्त्रियौ । स्त्रियः । स्त्रीः । स्त्रिया । स्त्रीभ्याम् । स्त्रीभिः । स्त्रियै । स्त्रीभ्यः२ । स्त्रियाः२ । स्त्रियोः२ । आमि परत्वान्नुट् । स्त्रीणाम् । स्त्रियाम् । स्त्रीषु । श्रीः । श्रियौ । श्रियः ।

नेयङुवङ्स्थानावस्त्री ॥ १ । ४ । ४ ॥

इयङुवङोः स्थितिर्ययोस्तावीदूतौ नदीसंज्ञौ न,न तु स्त्री । हे श्रीः । ङितिह्रस्वश्चेति वा नदीत्वम् । श्रियै । श्रिये । श्रियाः । श्रियः ।

वाऽऽमि ॥ १ । ४ । ५ ॥

इयङुवङ्स्थानौ यू स्त्र्याख्यौ वा आमि नदीसंज्ञौ न तु स्त्री । श्रियाम् । श्रीणाम् । वेदेतु "श्रीग्रामण्योश्छन्दसी" ति नित्यं नुट् । श्रीणाम् । श्रियाम् । श्रियि । सुध्यादयः पुम्वत् । सुष्ठुधीः प्रकृष्टा धी रिति नित्यस्त्रीत्वे सुधीप्रध्यौ लक्ष्मीवत् । अमि शसि च प्रध्यम् । प्रध्य इति विशेषः । धेनुर्मतिवत् । धेनुः । धेनू । धेनवः । इत्यादि । एवं तन्वादयः ।

स्त्रियाञ्च ॥ ७ । १ । ९६ ॥

स्त्रियां क्रोष्टुशब्दस्य तृजन्तवद्रूपम् ।

ऋन्नेभ्यो ङीप् ॥ ४ । १ । ५ ।

ऋदन्तेभ्यो नान्तेभ्यश्च ङीप् स्त्रियाम् । ङपावितौ । यण् । क्रोष्ट्री । क्रोष्ट्र्यौ । क्रोष्ट्र्यः । इत्यादि । गौरीवत् । वधूः । वध्वौ ।

वध्वः । छन्दसि तु "वाछन्दसी" ति पूर्वसवर्णदीर्घविकल्पः इत्यादि । एवं तन्वादयः ।

भ्रूः श्रीवत् । भ्रूः भ्रुवौ । भ्रुवः । इत्यादि । सुभ्रूः । पुनर्भूः खलपूवत् । नित्यस्त्रीत्वे । हे पुनर्भु ।

एकाजुत्तरपदे णः ॥ ८ । ४ । १२ ॥

एकाजुत्तरपदं यस्य तस्मिन्समासे पूर्वपदस्थान्निमित्तात्परस्य प्रातिपदिकान्तनुम्विभक्तिस्थस्य नस्य णः । पुनर्भूणाम् । शेषं वधूवत् । स्वयम्भूः पुंवत् ।

न षट्स्वस्रादिभ्यः ॥४।१।१०॥

षट्संज्ञकेभ्यः स्वस्रादिभ्यश्च ङीप्टापौ न ।

स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा ।
याता मातेति सप्तैते स्वस्रादय उदाहृताः ॥१॥

अप्तृन्निति दीर्घः । स्वसा । स्वसारौ । स्वसारः । धातृवत् । शसि स्वसॄरिति भेदः । माता पितृवत् । शसि मातॄः । द्यौर्गोवत् । राः पुंवत् । नौर्ग्लौवत् ।

इत्यजन्ताः स्त्रीलिङ्गाः ॥

अथाजन्तनपुंसकलिङ्गाः ।

:-o-:

अतोऽम् ॥ ७।१।२४।

अतोऽङ्गान्नपुंसकात्स्वमोरम् । अमि पूर्वः । ज्ञानम् । एङ् ह्रस्वा-त्सम्बुद्धेरितिहल्लोपः । हे ज्ञान ! ।

नपुंसकाच्च ॥ ७।१।१९ ॥

क्लीबात्परस्यौङः शी । भसंज्ञायाम् ।

यस्येति च ॥ ६।४।१४८ ॥

भस्येवर्णावर्णयोर्लोपः ईकारे तद्धिते च परे । इत्यकारलोपे प्राप्ते । (औङः श्यां प्रतिषेधो वाच्यः) ज्ञाने ।

जश्शसोः शिः ॥ ७।१।२० ॥

क्लीबादनयोः शिः ।

शि सर्वनामस्थानम् ॥ १।१।४२ ॥

शि इत्येतत्सर्वनामस्थानसंज्ञम् ।

नपुंसकस्य झलचः ॥ ७।१।७२ ॥

झलन्तस्याजन्तस्य च क्लीबस्य नुमागमः सर्वनामस्थाने । उपधाया दीर्घः । ज्ञानानि । पुनस्तद्वत् । शेषं पुरुषवत् । एवं धनवनफलादयः ।

अद्ड् डतरादिभ्यः पञ्चभ्यः ॥ ७।१।२५ ॥

एभ्यः क्लीवेभ्यः स्वमोरद्डादेशः ।

टेः ॥ ६।४।१४३ ॥

डिति परे भस्य टेर्लोपः ।

वाऽवसाने ॥ ८।४।५६ ॥

अवसाने झलां चरो वा। कतरत्। कतरद्। कतरे। कतराणि। कतमत्। कतमद्। कतमे। कतमानि। टेर्लोपादेङ्ह्रस्वादिति न सम्बुद्धिलोपः। हे कतमत्। पुनस्तद्वत्। शेषं पुंवत्। एवमन्यत्। अन्यतरत्। इतरत्। "नेतराच्छन्दसि" ७। १। २६ ॥ इतरम् २। (एकतरात्प्रतिषेधः) एकतरम्। स्वमोरमादेशे वा जरस्। अजरसम्। अजरम्। अजरसी। अजरे। परत्वाज्जरस्। पश्चाज्झलन्तत्वान्नुम्।

सान्तमहतः संयोगस्य ॥ ६।४।१०॥

सान्तसंयोगस्य महतश्च यो नकारस्तस्योपधाया दीर्घोऽसम्बुद्धौ सर्वनामस्थाने। अजरांसि। अजराणि। एवं तद्वत्। शेषं पुंवत्। पद्दन्निति हृदयोदकास्यानां, हृद्। उदन्। आसन्। हृन्दि। हृदा। हृद्भ्यामित्यादि। उदानि। उदना। उदभ्याम्। आसानि। आस्ना। आसभ्यामित्यादि।

ह्रस्वो नपुंसके प्रातिपदिकस्य ॥१।२।४७ ॥

क्लीबेऽजन्तस्य प्रातिपदिकस्य ह्रस्वः। श्रीपम्। ज्ञानवत्।

स्वमोर्नपुंसकात् ॥ ७।१।२३ ॥

क्लीबात्परयोः स्वमोर्लुक् । वारि ।

इकोऽचि विभक्तौ ॥ ७।१।७३ ॥

इगन्तस्य क्लीबस्य नुमचि विभक्तौ । वारिणी । वारीणि । घेर्ङितिं गुणे प्राप्ते (वृद्ध्यौत्त्वतृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन) वारिणे । वारिणः । वारिणोः । नुमचिरेति नुट् । नुटः प्रत्ययावयवत्वान्नामीति दीर्घत्वम् । वारीणाम् । वारिणि । वारिणोः । हलादौ तु हरिवत् ।

तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य ॥ ७।१।७४ ॥

समानेऽर्थउक्तपुंस्कमिगन्तं क्लीबं पुंवद्वा टादावचि । अनादिने । अनादये । समानेसादि किम् । पीलुने फलाय । पीलुर्वृक्षस्तत्फलं पीलु ।

---

(१) "नलुमते"ति निषेधस्य नित्यत्वे सम्बुद्धेर्लुकि तन्निमित्तनुमोऽप्राप्तेरिकोचीत्यज्ग्रहणं व्यर्थं स्यान्नचान्यत्र हलादौ नुमोऽभावार्थमिदं,कृतेऽपि नुमि तल्लोपस्य सम्भवात् । अतोऽचीत्युक्तेरेवं ज्ञायते "नलुमते" त्यस्यानित्यत्वात्सम्बुद्धेर्लुक्यपि प्रत्ययलक्षणत्वेन नुम्स्यान्न च तल्लोपः कर्तुं शक्यः "न ङिसम्बुद्ध्योः" रितिनिषेधात् । अतस्तत्र नुमभावार्थमज्ग्रहणं कृतम् । तेन नलुमतेतिनिषेधस्यानित्यत्वात्पक्षे सम्बुद्धिनिमित्तो गुणः । हे वारे । हे वारि । हे वारिणी । हे वारीणि ।

[२] ननु पीलवे । वृक्षे स्त्रियां पीलुत्वं त्रजन्त तत्फले पुनः ।

अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः ॥ ७।१।७५ ॥

एषामनङ् स्याट्टादावचि स चोदात्तः । अल्लोपोऽनः । दध्ना । दध्ने । दध्नः । दध्नोः । दध्नाम् । दध्नि । दधनि । शेषं वारिवत् । एवमस्थिसक्थ्यक्षि । वेदे तु— "छन्दस्यपि दृश्यते" "ई च द्विवचने" इसाभ्यामन्यत्रानङ्, ई चादेशः । पश्येमाक्षिभिः ।-अक्षी ते । सुधि । सुधिनी । सुधीनि । सुधिया । सुधिनेत्यादि । एवं प्रध्यादयः । मधु । मधुनी । मधूनि । मधुना । मधुभ्यामित्यादि । एवमम्बुसान्वादयः । सानुशब्दस्य स्नुर्वा । सानुनी । स्नूनि । सानूनि । सुलु । सुलुनी । सुलूनि । सुल्वा । सुलुनेत्यादि । प्रियक्रोष्टु । प्रियक्रोष्टुनी । प्रियक्रोष्टूनि । हे प्रियक्रोष्टु । हे प्रियक्रोष्टो । टादौ पुंवत्पक्षे । प्रियक्रोष्ट्रा । प्रियक्रोष्टुना । अन्यत्र तृज्वद्भावात् पूर्वविप्रतिषेधेन नुम् । प्रियक्रोष्टुना । प्रियक्रोष्ट्रे । प्रियक्रोष्टवे । प्रियक्रोष्टुने । प्रियक्रोष्टूनाम् । धातृ । धातृणी । धातॄणि । हे धातः । हे धातृ । पुनस्तथा । धात्रा । धातृणेत्यादि । एवं ज्ञात्रादयः ।

एच इग्घ्रस्वादेशे ॥ १।१।४८ ॥

ह्रस्वे कार्ये एच इगेव । प्रद्यु । प्रद्युनी । प्रद्यूनि । पुनस्तद्वत्

---

(१) तदन्तस्याप्यनङिष्यते । प्रियदध्ना ब्राह्मणेन । प्रियसक्थ्ना । प्रियाक्ष्णा । प्रियास्थ्ना ।

(२) तृज्वद्भावात्पूर्वविप्रतिषेधेन नुम् ।

प्रशुनेत्यादि । प्रशि । प्रशिणी । प्रशीणि । प्रशिणेत्यादि ।
सुनु । सुनुनी । सुनूनि । सुनुनेत्यादि ।

इत्यजन्ता नपुंसकलिङ्गाः ।

अथ हलन्तपुँल्लिङ्गप्रकरणम् ।

—०—

हो ढः ॥ ८ । २ । ३१ ॥

झलि पदान्ते च हस्य ढः । हल्ङ्याबिति सुलोपः । जश्त्वचर्त्वे । लिट् । लिड् । लिहौ । लिहः । लिहम् । लिहौ । लिहः । लिहा । लिड्भ्यामित्यादि । खरिचेतिचर्त्वम् । लिट्सु । लिट्त्सु ।

दादेर्धातोर्घः ॥ ८ । २ । ३२ ॥

उपदेशे दकारादेर्धातोर्हस्य घो झलि पदान्ते च ।

एकाचो बशो भष् झषन्तस्य स्ध्वोः ॥८।२।३७॥

एकाचो धातोरवयवस्य झषन्तस्य बशः स्थाने भष् सकारे ध्वशब्दे पदान्ते च । झलाजशोऽन्ते । वाऽवसाने । धुक् । धुग् । दुहौ । दुहः । षत्वचर्त्वे । धुक्षु ।

वा द्रुहमुहष्णुहष्णिहाम् ॥ ८ । २ । ३३ ॥

एषां हस्य वा घो झलि पदान्ते च । पक्षे ढः । ध्रुक् । ध्रुग् । ध्रुट् । ध्रुड् । द्रुहौ । द्रुहः । द्रुहां । ध्रुग्भ्याम् । ध्रुड्भ्याम् । ध्रुक्षु । ध्रुट्सु । ध्रुट्त्सु । एवं मुहष्णुहष्णिहः ।

वाह ऊठ् ॥ ६ । ४ । १३२ ॥

भस्य वाहः सम्प्रसारणमूठ् । एत्येधत्यूठ्स्विति वृद्धिः । विश्वौहः । विश्वौहेत्यादि । शेषं लिड्वत् ।

चतुरनडुहोराम्रुदात्तः ॥ ७ । १ । ९८ ॥

अनयोः सर्वनामस्थाने आम् स चोदात्तः ।

सावनडुहः ॥ ७ । १ । ८२ ॥

अस्य नुम् सौ । सोर्लोपः । संयोगान्तस्य लोपः । नुम्विधिसामर्थ्याद् वसुस्रंस्विति दत्वम्न । संयोगान्तलोपस्यासिद्धत्वान्नलोपो न । अनड्वान् ।

अम्सम्बुद्धौ ॥ ७ । १ । ९९ ॥

चतुरनडुहोः सम्बुद्धावम् । आमोऽपवादः । हे अनड्वन् ।

(१)—तदन्तविधिरत्रेष्यते । प्रियानड्वान् । प्रियानड्वाहौ । प्रियानड्वाहः ।

हे अनड्वाहौ । हे अनड्वाहः । अनड्वाहम् । अनड्वाहौ । अनडुहः । अनडुहा ।

वसुस्रंसुध्वंस्वनडुहां दः ॥ ८ । २ । ७२ ॥

सान्तवस्वन्तस्य स्रंसादेश्च दो झलि पदान्ते च । अनडुद्भ्यामित्यादि । सान्तेतिकिम् । विद्वान् । (श्वेतवाडुक्थशास्पुरोडाशश्वयाजां डस्पदान्त इति वाच्यम्) ड इत् । डित्वसामर्थ्यादभस्यापि टेर्लोपः ।

अत्वसन्तस्य चाधातोः ॥ ६ । ४ । १४ ॥

अत्वन्तस्यासन्तस्य चोपधाया दीर्घः स्यादसम्बुद्धौ सौ न तु धातोः । श्वेतवाः ।

सहेः साडः सः ॥ ८ । ३ । ५६ ॥

साड्रूपस्य सहेः सस्य मूर्द्धन्यादेशः । तुराषाट् । तुराषाड् । तुरासाहौ । तुरासाहः । तुरासाहम् । तुरासाहौ । तुरासाहः । तुरासाहा । तुराषाड्भ्याम् इत्यादि ।

---

(१)–(अवयाः श्वेतवाः पुरोडाश्च) एते कृतदीर्घाः सम्बुद्धौ निपात्यन्ते । चादुक्थशाः । हे श्वेतवाः । वेति केचित् । हे श्वेतवः । श्वेतवाहौ । श्वेतवाहः । श्वेतवाहम् । श्वेतवाहौ । ऊठ् वाऽस्येतिकेचित् । श्वेतौहः । श्वेतवाहः । श्वेतौहा । श्वेतवोभ्याम् । श्वेतवोभिरित्यादि । श्वेतवस्सु । श्वेतवःसु ।

दिव औत् ॥ ७ । १ । ८४ ॥

दिविति प्रातिपदिकस्यौत्सौ । सुद्यौः(१) । सुदिवौ । सुदिवः

दिव उत् ॥ ६ । १ । १३१ ॥

दिवोऽन्तादेश उकारः पदान्ते । सुद्युभ्याम् । सुद्युभिः इत्यादि । चत्वारः । चतुरः । चतुर्भिः । चतुर्भ्यः ।

षट्चतुर्भ्यश्च ॥ ७ । १ । ५५ ॥

षट्संज्ञकेभ्यश्चतुरश्च परस्यामो नुट् । णत्वम् । चतुर्णाम्

रोः सुपि ॥ ८ । ३ । १६ ॥

सप्तमीबहुवचने रोरेव विसर्गो नान्यस्य रेफस्य । षत्वम् । षस्य द्वित्वे प्राप्ते—

शरोऽचि ॥ ८ । ४ । ४९ ॥

अचि परे शरो द्वे न स्तः । चतुर्षु ।

मो नो धातोः ॥ ८ । २ । ६४ ॥

---

(१)–अनल्विधावित्युक्तेरलाश्रितत्वेन स्थानिवत्वाभावाद्धल्ङ्या- बिति सुलोपो न ।

(२)–प्रियचत्वाः । हे प्रियचत्वः । प्रियचत्वारौ । गौणत्वे तु नुट् नेष्यते । प्रियचतुराम् । प्राधान्ये तु स्यादेव । परमचतुर्णाम् ।

धातोर्मस्य नः स्याज्झलि पदान्ते च । प्रशान् । प्रशामौ । प्रशामः । प्रशामा । प्रशान्भ्यामित्यादि ।

किमः कः ॥ ७ । २ । १०३ ॥

किमः को विभक्तौ । कः । कौ । के । केन । काभ्यामित्यादि । सर्ववत् ।

इदमो मः ॥ ७ । २ । १०८ ॥

इदमो दस्य मः सौ । त्यदाद्यत्वापवादः ।

इदोऽय् पुंसि ॥ ७ । २ । १११ ॥

इदम इदः स्थानेऽय् सौ पुंसि । स्रोर्लोपः । अयम् । त्यदाद्यत्वे कृते—

अतो गुणे ॥ ६ । १ । ९७ ॥

अपदान्तादकारादगुणे पररूपमेकादेशः ।

दश्च ॥ ७ । २ । १०९ ॥

इदमो दस्य मो विभक्तौ । इमौ । इमे । त्यदादेः प्रायः सम्बोधनाभावः । इमम् । इमौ । इमान् ।

अनाप्यकः ॥ ७ । २ । ११२ ॥

(१)—मत्वस्यासिद्धत्वान्नलोपो न ।
(२)—अकच्सहितस्याप्ययमादेशः ।
(३)—कदेशस्य स्थानिवत्त्वादङ्गकार्यम् ।
(४)—आबिति टाइत्यारभ्य सुपः पकारेण प्रत्याहारः ।

अककारस्येदम इदोऽन् स्यादापि विभक्तौ । अनेन ।

हलि लोपः ॥ ७ । २ । ११३ ॥

अककारस्येदम इदो लोपः स्यादापि हलादौ । नाऽ- नोऽल्विधिः ।

आद्यन्तवदेकस्मिन् ॥ १ । १ । २१ ॥

एकस्मिन्क्रियमाणं कार्यमादाविवान्त इव स्यात् । सुपिचे- तिदीर्घः । आभ्याम् ।

नेदमदसोरकोः ॥ ७ । १ । ११ ॥

अककारयोरिदमदसोर्भिस ऐस् न । एत्वम् । एभिः । अ- स्मै । ङेःस्मै । पश्चाल्लोपः । अस्मै । आभ्याम् । एभ्यः । अस्मात् । आभ्याम् । एभ्यः । अस्य । अनयोः । एषाम् । अस्मिन् । अनयोः । एषु । ककारयोगे तु । इमकेन । इमकाभ्याम् । इमकैः । इत्यादि ।

द्वितीयाटौस्स्वेनः ॥ २ । ४ । ३४ ॥

द्वितीयायां टौसोश्च परयोरिदमेतदोरेनादेशोऽन्वादेशे । उक्तस्य पुनरुक्तिरन्वादेशः । एनम् । एनौ । एनान् । एनेन । एनयोः २ । उपधादीर्घः । सोर्लोपः । नस्य लोपः । राजा ।

न ङिसम्बुद्ध्योः ॥ ८ । २ । ८ ॥

(१)—"नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे" इतिवचनात् ।

नस्य लोपो न ङौ सम्बुद्धौ च । हे राजन् । राजानौ । राजानः । राजानम् । राजानौ । अल्लोपोऽनः । राज्ञः । राज्ञा ।

नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति ॥ ८ । २ । २ ॥

सुब्विधौ स्वरविधौ संज्ञाविधौ कृति तुग्विधौ च नलोपोऽसिद्धो नान्यत्र । राजाभ्यामित्यादौ, इत्यसिद्धत्वादात्वमेत्वमैस्त्वञ्च न । राजभ्याम् । राजभिः । विभाषा ङिश्योः । राज्ञि । राजनि । इत्यादि । एवं मतिदिवन् ।

न संयोगाद्वमन्तात् ॥ ६ । ४ । १३७ ॥

वकारान्तमकारान्तसंयोगादनोऽकारस्य लोपो न । यज्वनः । यज्वना । ब्रह्मणः । ब्रह्मणेत्यादि । राजवत् ।

सौ च ॥ ६ । ४ । १३ ॥

इन्हन्पूषार्यम्णामसम्बुद्धौ सावुपधाया दीर्घः । वृत्रहा । हे वृत्रहन् । एकाजुत्तरपदेति प्रातिपदिकान्तस्य नस्य णत्वम् । वृत्रहणौ । वृत्रहणः । वृत्रहणम् । वृत्रहणौ । अल्लोपः ।

हो हन्तेर्ञ्णिन्नेषु ॥ ७ । ३ । ५४ ॥

ञिति णिति च प्रत्यये नकारे परे हन्तेर्हस्य कुत्वम् ।

हन्तेरत्पूर्वस्य ॥ ८ । ४ । २२ ॥

---

(१)-अस्य भविषयेऽल्लोपस्यदीर्घविधौस्थानिवत्त्वाभावात्प्रतिदीव्नइत्यादि ।

हन्तेरत्पूर्वस्यैव नस्य णत्वं नान्यस्य । वृत्रघ्नः । वृत्रघ्ना । वृत्रहभ्यामित्यादि । एवं शार्ङ्गिन्यशस्विन्अर्यमन्पूषन्प्रभृतयः । पूर्ष्णि(१) । पूषणि ।

मघवा बहुलम् ॥ ६ । ४ । १२८ ॥

मघवन्शब्दस्य वा तृ इत्यन्तादेशः । ऋइत् ।

उगिदचां सर्वनामस्थानेऽधातोः ॥ १ । १ । १२ ॥

अधातोरुगितो नलोपिनोऽञ्चतेश्च नुमागमः सर्वनामस्थाने । सर्वनामस्थानेचेत्युपधादीर्घः । मघवान् । मघवन्तौ । मघवन्तः । मघवन्तम् । मघवन्तौ । मघवतः । मघवता । मघवद्भ्यामित्यादि । तृत्वाभावे मघवा सुदिराजवत् ।

इग्यणः सम्प्रसारणम् ॥ १ । १ । ४५ ॥

यणः स्थाने भूतो भावी वा य इक् स सम्प्रसारणसंज्ञः ।

श्वयुवमघोनामतद्धिते ॥ ६ । १ । ३७ ॥

भसंज्ञकानामेषामतद्धिते सम्प्रसारणम् ।

सम्प्रसारणाच्च ॥ ६ । १ । १०८ ॥

सम्प्रसारणादचि पूर्वपरयोः पूर्वरूपमेकादेशः । आद्गुणः । मघोनः । मघोना । मघवभ्यामित्यादि । अतद्धिते किम् । माघवनम् । शुनः । शुना । श्वभ्यामित्यादि । युवन्शब्दे वस्य उत्वे कृते ।

(१)-डॉ टिलोपावेतिकेचित् । पूषि ।

न सम्प्रसारणे सम्प्रसारणम् ॥ ६ । १ । ३१ ॥

सम्प्रसारणे परे पूर्वस्य यणः सम्प्रसारणं न । इति यकारस्य न सम्प्रसारणम् । अतएव ज्ञापकादन्त्यस्य यणः पूर्वं सम्प्रसारणम् । यूनः । यूना । युवभ्यामित्यादि । अर्वा । हे अर्वन् ।

अर्वणस्त्रसावनञः ॥ ६ । ४ । २१ ॥

नञ्भिन्नस्यार्वणस्तृ इत्यन्तादेशोऽसौ । अर्वन्तौ । अर्वन्तः । अर्वन्तम् । अर्वन्तौ । अर्वतः । अर्वता । अर्वद्भ्यामित्यादि । अनञः किम् । अनर्वा । अनर्वाणौ । यज्ववत् ।

पथिमथ्यृभुक्षामात् ॥ ७ । १ । ८५ ॥

एषां सावाकारोऽन्तादेशः ।

इतोऽत्सर्वनामस्थाने ॥ ७ । १ । ८६ ॥

पथ्यादेरिकारस्याकारः सुटि ।

थो न्थः ॥ ७ । १ । ८७ ॥

पथिमथोस्थस्य न्थादेशः सर्वनामस्थाने । स्थानिवत्त्वाभावान्न सुलोपः । पन्थाः । उपधादीर्घः । पन्थानौ । पन्थानः । पन्थानम् । पन्थानौ ।

भस्य टेर्लोपः ॥ ७ । १ । ८८ ॥

भसंज्ञकस्य पथ्यादेष्टेर्लोपः । पथः । पथा । पथिभ्यामित्यादि । एवं मथा, ऋभुक्षाः । "नोपपूर्वस्यनिगमे" ६ । ४ । ९ । इत्युपधाया वा दीर्घः । ऋभुक्षाणौ । ऋभुक्षणौ ।

ष्णान्ता षट् ॥ १ । १ । २४ ॥

उपदेशे षान्ता नान्ता च संख्या षट्संज्ञा । षड्भ्यो लुक् । षड्द । पञ्च । उपदेशेकिम् । शतानि । २। षट्चतुर्भ्यश्चेतिनुट् ।

नोपधायाः ॥ ६ । ४ । १ ॥

नान्तस्योपधाया दीर्घो नामि । नलोपः । पञ्चानाम् ।

अष्टन आ विभक्तौ ॥ १ । २ । ८४ ॥

अष्टन आत्वं विभक्तौ ।

अष्टाभ्य औश् ॥ १ । १ । २१ ॥

कृताकारादष्टनः परयोर्जश्शसोरौश् । अष्टाभ्यइतिदीर्घोच्चारणं ज्ञापकमात्वाविकल्पस्येति भाष्ये स्पष्टम् । अष्टौ । २ । परमाष्टौ २। आत्वाभावे । अष्ट २। अष्टभिः । अष्टभ्यः २। अष्टानाम् । परमाष्टानाम् । अष्टसु। "एकाचोवश" इतिभष्भावः । जश्त्वचर्त्वे। भुत् । भुद् । बुधौ । बुधः । बुधम् । बुधौ । बुधः । बुधा । भुद्भ्यामित्यादि ।

(१)–तदन्तग्रहणमत्रेष्यते । परमपञ्च । गौणत्वे तु न । प्रियपञ्चानः । पञ्चभिः । पञ्चभ्यः । षट्चतुर्भ्यश्चेतिनुट् । गौणत्वे तु नुट् नेष्यते । प्रियपञ्चाम् ।

(२)–गौणत्वे तु नात्वम् । प्रियाष्टा । आत्वस्याभावादौश्त्वं न प्रियाष्टानः । प्रियाष्टनाम् । गौणत्वेप्यात्वं, जस्शसोरौश्त्वं चेत्येके । प्रियाष्टा । प्रियाष्टौ । जसि शसि च प्रियाष्टौ । आमि न नुट् । प्रियाष्टनाम् । शर्षदाद्यवदित्यादिहरदत्तादयः । भाष्यमते त्वयं सर्वो विचारो निष्फलइति भाष्यविदः ॥

ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च ॥ ३ । २ । ५९ ॥

आद्याः पञ्च क्विन्नन्ता निपात्यन्ते । त्रिभ्यः क्विन् विधीयते । अञ्चेः सुप्युपपदे क्विन् । युजिक्रुञ्चोः केवलयोः । क्रुञ्चेर्नलोपाभावश्च निपात्यते । क, इ, न्, एते इतः ॥

कृदतिङ् ॥ ३ । १ । ९३ ॥

अत्र लिङ्भिन्नः प्रत्ययः कृत्संज्ञः ॥

वेरपृक्तस्य ॥ ६ । १ । ६७ ॥

अपृक्तस्य वस्य लोपः ॥

युजेरसमासे ॥ ७ । १ । ७१ ॥

युजेः सुटि नुम् असमासे । सुलोपः । संयोगान्तलोपः ॥

क्विन्प्रत्ययस्य कुः ॥ ८ । २ । ६२ ॥

क्विन्नन्तस्य धातोः कवर्गोऽन्तादेशो झलि पदान्ते च । युङ् । अनुस्वारपरसवर्णौ । युञ्जौ । युञ्जः । युञ्जम् । युञ्जौ । युजः । युजा । युग्भ्यामित्यादि । असमासे किम् ॥

चोः कुः ॥ ८ । २ । ३० ॥

चवर्गस्य कवर्गो झलि पदान्ते च । सुयुक् । सुयुग् । सुयुजौ ।

---

(१)—व्याख्यानात् समाध्यर्थस्य युजेर्न नुम् । युक् । समाधिमानित्यर्थः ।

सुयुजः । सुयुजा । सुयुग्भ्यामित्यादि । संयोगान्तस्य लोपः । खन् । खञ्जौ । खञ्जः । इत्यादि । व्रश्चेति षत्वम् । जश्त्वच-र्त्वे । राट् । राड् । राजौ । राजः । राजम् । राजौ । राजः । राजा । राड्भ्यामित्यादि । एवं विभ्राट् । देवेट् । विश्वसृट् । विश्वसृड् । (परौ व्रजेः षः पदान्ते) इति षत्वम् । परिव्राट् ।

विश्वस्य वसुराटोः ॥ ६ । ४ । १२८ ॥

विश्वशब्दस्य दीर्घोऽन्तादेशो वसौ राट्शब्दे च । विश्वा-वसुः । विश्वाराट् । ड् । विश्वराजौ । विश्वराजः ।

स्कोस्संयोगाद्योरन्ते च ॥ ८ । २ । २९ ॥

पदान्ते झलि च यः संयोगस्तदाद्योः स्कोर्लोपः । भृट् । भृड् । श्चुत्वे कृते झलांजशूझशीति शस्य जः । चुत्वम् । भृज्जौ । भृज्जः । इत्यादि । क्विन्नन्तत्वात्कुत्वम् । ऋत्विक् । ऋत्विग् । ऋत्विजौ । ऋत्विजः । इत्यादि । रात्सस्येति नियमान्न संयोगा-न्तलोपः । चोः कुः । ऊर्क् । ऊर्ग् । ऊर्जौ । ऊर्जः । इत्यादि । अवयाः । अवयाजौ । अवयाजः । हे अवयाः । अवयाजम् । अवयाजौ । अवयाजः । अवयाजा । अवयोभ्यामित्यादि । सदा-द्यत्वम् । पररूपत्वम् ।

तदोः सः सावनन्त्ययोः ॥ ७ । २ । १०६ ॥

त्यदादीनां तकारदकारयोरनन्त्ययोः सः स्यात्सौ । स्यः ।

स्यौ । स्ये । सः । तौ । ते । इत्यादि सर्ववत् । परमसः । परमतौ । परमते । संज्ञायां गौणत्वे च नात्वम् । त्यत् । स्यद् । स्यदौ । स्यदः । अतिसत् । अतिसदौ । अतिसदः । एवं यत् । एषः । एतौ । एते । इत्यादि । अन्वादेशे तु । द्वितीयाटौःस्वेनः । एनम् । एनौ । एनान् । एनेन । एनयोः ।

ङे प्रथमयोरम् ॥ ७ । १ । २८ ॥

युष्मदस्मद्भ्यां परस्य ङेइत्यस्य प्रथमाद्वितीययोश्चामादेशः ।

त्वाहौ सौ ॥ ७ । २ । ९४ ॥

युष्मदस्मदोमपर्यन्तस्य क्रमात्त्वाहावादेशौ स्तः सौ ।

शेषे लोपः ॥ ७ । २ । ९० ॥

आत्वयत्वनिमित्तेतरविभक्तौ परतो युष्मदस्मदोरन्त्यस्य लोपः । अतोगुणे । अमि पूर्वः । त्वम् । अहम् । शेषे लोपेऽलिङ्गत्वादिलोपाद्वा टाप् न । त्वं स्त्री । अहं स्त्री । परमत्वम् । परमाहम् । अतित्वम् । अत्यहम् ।

युवावौ द्विवचने ॥ ७ । २ । ९२ ॥

द्विवचनइत्यर्थग्रहणम् । द्व्यर्थवाचिनोर्युष्मदस्मदोर्मपर्यन्तस्य क्रमाद् युवावौ स्तः ।

प्रथमायाश्च द्विवचने भाषायाम् ॥ ७ । २ । ८८ ॥

प्रथमायां द्विवचने परे युष्मदस्मदोराकारोऽन्तादेशः स्याद्भाषायाम् । युवाम् । आवाम् । मपर्यन्तस्य किम् । साकच्कस्य माभूत् । युवकाम् । आवकाम् ।

यूयवयौ जसि ॥ ७ । २ । ९३ ॥

युष्मदस्मदोर्मपर्यन्तस्य यूयवयौ स्तो जसि । शेषे लोपः । यूयम् । वयम् ।

त्वमावेकवचने ॥ ७ । २ । ९७ ॥

एकार्थवाचिनोर्युष्मदस्मदोर्मपर्यन्तस्य त्वमौ स्तः ।

द्वितीयायाञ्च ॥ ७ । २ । ८७ ॥

द्वितीयायां परतो युष्मदस्मदोराकारोऽन्तादेशः । त्वाम् । माम् । युवाम् । आवाम् ।

शसो न ७ । १ । २९ ॥

युष्मदस्मद्भ्यां परस्य शसो नकारः । अमोऽपवादः । आदेः परस्य । संयोगान्तस्य लोपः । युष्मान् । अस्मान् ।

योऽचि ॥ ७ । २ । ८९ ॥

युष्मदस्मदोर्यकारोऽन्तादेशः स्यादनादेशेऽजादौ परे । त्वया । मया ।

(१)—एकवचन इत्यर्थनिर्देशः ।

युष्मदस्मदोरनादेशे ॥ ७।२।८६ ॥

युष्मदस्मदोराकारः स्यादनादेशे हलादौ । युवाभ्याम् । आवाभ्याम् । युष्माभिः । अस्माभिः ॥

तुभ्यमह्यौ ङयि ॥ ७।२।९५ ॥

युष्मदस्मदोर्मपर्यन्तस्य तुभ्यमह्यौ स्तो ङयि । अमादेशः । शेषे लोपः । तुभ्यम् । मह्यम् । परमतुभ्यम् । परममह्यम् । अतितुभ्यम् । अतिमह्यम् । युवाभ्याम् । आवाभ्याम् ॥

भ्यसो भ्यम् ॥ ७।१।३० ॥

युष्मदस्मद्भ्यां परस्य भ्यसोभ्यम् । शेषे लोपः । (अङ्गान्त्यकार्ये कृते पुनर्नाङ्गान्त्यकार्यम्) । तेनैत्वम् । अभ्यमित्यादेशो वा । युष्मभ्यम् । अस्मभ्यम् ॥

एकवचनस्य च ॥ ७।१।३२ ॥

आभ्यां परस्य पञ्चम्येकवचनस्यादित्यादेशः । त्वत् । मत् । युवाभ्याम् । आवाभ्याम् ॥

पञ्चम्या अत् ॥ ७।१।३१ ॥

आभ्यां पञ्चम्या भ्यसोऽत्स्यात् । युष्मत् । अस्मत् ।

तवममौ ङसि ॥ ७।२।९६ ॥

युष्मदस्मदोर्मपर्यन्तस्य तवममौ स्तो ङसि ॥

युष्मदस्मद्भ्यां ङसोऽश् ॥ ७ । १ । २७ ॥

आभ्यामपरस्य ङसः स्थानेऽश् । शइत् । तव । मम । अतितव । अतिमम । योऽचि । युवयोः । आवयोः ॥

साम आकम् ॥ ७ । १ । ३३ ॥

आभ्यामपरस्य सुट्सहितस्याम आकं स्यात् । युष्माकम् । अस्माकम्¹ । त्वयि । मयि । युवयोः । आवयोः । आत्वम् । युष्मासु । अस्मासु ॥

समस्यमाने द्व्येकत्ववाचिनी युष्मदस्मदी ।
समासार्थोऽन्यसंख्यश्चेत्तो युवावौ त्वमावपि ॥ १ ॥
सुजस्ङेङस्सु परत आदेशाः स्युः सदैव ते ।
त्वाहौ यूयवयौ तुभ्यमह्यौ तवममावपि ॥ २ ॥
एते परत्वाद्बाधन्ते युवावौ विषये स्वके ।
त्वमावपि प्रबाधन्ते पूर्वविप्रतिषेधतः ॥ ३ ॥
द्व्येकसंख्यः समासार्थो बह्वर्थे युष्मदस्मदी ।
तयोरद्व्येकतार्थत्वान्न युवावौ त्वमौ च न ॥ ४ ॥

त्वां मां वा अतिक्रान्त इति विग्रहे—अतित्वम् । अत्यहम् । अतित्वाम् २ । अतित्वाम् । अतिमाम् । अतियूयम् । अतिवयम् । अतित्वाम् २ । अतिमाम् २ । अतित्वान् । अतिमान् । अतित्वया । अतिमया ।

१)—भाविनः सुटो व्यावृत्त्यर्थंससुट्कनिर्देशः ।

अतित्वाभ्याम् । अतिमाभ्याम् । अतित्वाभिः । अतिमाभिः ।
अतियुष्मभ्यम् । अतिमह्यम् । भ्यामि प्राग्वत् । अतित्वभ्यम् । अ-
अतिमभ्यम् । अतित्वत् । अतिमत् । भ्यामि प्राग्वत् । भ्यसि ङ-
सिवत् । अतितव । अतिमम । अतित्वयोः । अतिमयोः । अति-
त्वाकम् । अतिमाकम् । गौणतायामसर्वनामत्वेन सुडभावात्साम-
आकमिसस्थानवृत्तेर्योऽचीति यकार इति केचित् । अतित्वयाम् ।
अतिमयाम् । अतित्वयि । अतिमयि । ओसि प्राग्वत् । अतित्वा-
सु । अतिमासु । युवां आवां वा अतिक्रान्त इति विग्रहे । सुजस्-
ङिङस्सु प्राग्वत् । औ, अम्, औट्सु । अतियुवाम् ३ । अत्यावा-
म् ३ ॥ अतियुवान् । अत्यावान् । अतियुवया । अत्यावया ।
भ्यामि । अतियुवाभ्याम् ३ । अत्यावाभ्याम् ३ ॥ अतियुवाभिः ।
अत्यावाभिः । भ्यसि । अतियुवभ्यम् । अत्यावभ्यम् । ङसिभ्य-
सोः । अतियुवत् । अत्यावत् । अतियुवयोः २ । अत्यावयोः २ ।
अतियुवाकम् । अत्यावाकम् । अतियुवयाम् । अत्यावयाम् । इति-
केचित् । अतियुवयि । अत्यावयि । अतियुवासु । अत्यावासु ।
युष्मानस्मान्वाअतिक्रान्त इत्यत्र सुजस्ङेङस्सु प्राग्वत् । औ,
अम्, औट्सु । अतियुष्माम् ३ । अत्यस्माम् ३ । अतियुष्मान् ।
अत्यस्मान् । अतियुष्मया । अत्यस्मया । भ्यामि । अतियुष्माभ्याम् ३ ।
अत्यस्माभ्याम् ३ । अतियुष्माभिः । अत्यस्माभिः । भ्यसि । अ-
तियुष्मभ्यम् । अत्यस्मभ्यम् । ङसिभ्यसोः । अतियुष्मत् । अत्य-

स्मत् । ओसि । अतियुवयोः२ । अस्मावयोः२ । अतियुष्माकम् । अस्मस्माकम् । अतियुष्मयाम् । अस्मस्मयामिति केचित् । अतियुष्मयि । अस्मस्मयि । अतियुष्मासु । अस्मस्मासु । शेषं प्राग्वत् ।

युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ ॥ ८ । १ । २० ॥

पदात्परयोरपादादौ स्थितयोरनयोः षष्ठ्यादिबहुवचनान्तयोः क्रमाद्वान्नाविसादेशौ स्तः । ग्रामो वां स्वम् । जनपदो नौ स्वम् । ग्रामो वां दीयते । जनपदो नौ दीयते । माणवको वां पश्यति । माणवको नौ पश्यति ।

बहुवचनस्य वस्नसौ ॥ ८ । १ । २१ ॥

उक्तविधयोरेवानयोः षष्ठ्यादिबहुवचनान्तयोर्वस्नसौ स्तः । विद्या वो धनम् । राज्यं नो धनमित्यादि ।

तेमयावेकवचनस्य ॥ ८ । १ । २२ ॥

तादृशयोरनयोः षष्ठीचतुर्थ्येकवचनान्तयोस्तेमे,इत्येतौ स्तः । एष ते ग्रामः । एष मे ग्रामइत्यादि ।

त्वामौ द्वितीयायाः ॥ ८ । १ । २३ ॥

[१]—पदात्परयोः किम् । वाक्यादौ मा भूत्—त्वां पातु । मां पातु । अपादादौ किम् । युष्मान् रक्षतु विश्वेशोऽस्मानीशः सर्वदाऽवतु । स्थग्रहणाद्विभक्तिलोपे, नैते स्युः । युवयोः पुत्रो युष्मत्पुत्रः ।

तादृग्विधयोरनयोर्द्वितीयैकवचनान्तयोस्त्वामा इत्येतौ स्तः। एष त्वा रक्षति । एष मा रक्षति । (एते वान्नावादयआदेशा अनन्वादेशे वा वक्तव्याः) अन्वादेशे तु नित्यं स्युः। धाता ते तव वाऽपत्यम् । तस्मै ते नमः ।

न चवाहाहैवयुक्ते ॥ ८ । १ । २४ ॥

चादिपञ्चकयोगे नैते, आदेशाः । आवयोर्युवयोश्चेशो हरिर्मामिव रक्षतु । साक्षाद्योगेऽयं निषेधः । युक्तयुक्ते तु न निषेधः । हरो हरिश्च मे स्वामी ।

पश्यार्थैश्चानालोचने ॥ ८ । १ । २५ ॥

अचाक्षुषज्ञानार्थैर्धातुभिर्योगे नैते स्युः । चेतसा त्वां समीक्षते । युक्तयुक्तेऽपि निषेधः । भक्तस्तव रूपं ध्यायति । आलोचने तु-भक्तस्त्वा पश्यति चक्षुषा ।

सपूर्वायाः प्रथमाया विभाषा ॥ ८ । १ । २६ ॥

विद्यमानपूर्वात्प्रथमान्तात्परयोरन्वादेशेऽप्येते आदेशा वा स्युः । भक्तस्त्वमप्यहं तेन हरिस्त्वां त्रायते स माम् । त्वामेतिवा । सुपात् । सुपाद् । सुपादौ । सुपादः । सुपादम् । सुपादौ ।

[१]-विशेष्यपूर्वं सम्बोधनेतरपूर्वं सम्बोधनं हित्वाऽन्यस्मात्सम्बोधनान्तात्परयोर्नैते, आदेशा इतिकेचित् । देवास्मान्पाहि । हे हरे विष्णोऽस्मान्रक्ष सर्वदा । विशेष्यपूर्वात्तु । हरे कृपालो नः पाहि । असम्बोधनपूर्वात्तु सर्वदा रक्ष देव नः ।

पादः पत् ॥ ६ । ४ । १३० ॥

पाच्छब्दस्य भस्य पदादेशः । सुपदः । सुपदा । सुपाद्भ्या-मित्यादि । अग्निमत् । अग्निमद् । अग्निमथौ । अग्निमथः । अग्नि-मद्भ्यामित्यादि । मोपसृष्टादञ्चूधातोः क्विन् ।

अनिदितां हल उपधायाः क्ङिति ॥ ६ । ४ । २४ ॥

हलन्तानामनिदितामङ्गानामुपधाया नकारस्य लोपः स्या-त्किति ङिति च परे । उगिदचामितिनुम् । संयोगान्तस्य लोपः। नकारस्य कुत्वेन ङकारः । प्राङ् । अनुस्वारपरसवर्णौ । प्राञ्चौ । प्राञ्चः । प्राञ्चम् । प्राञ्चौ ।

अचः ॥ ६ । ४ । १३८ ॥

लुप्तनकारस्याञ्चतेर्भस्याकारस्य लोपः ।

चौ ॥ ६ । ३ । १३८ ॥

लुप्ताकारेऽञ्चतौ परे पूर्वस्याणः स्थाने दीर्घः । प्राचः । प्रा-चा । प्राग्भ्यामित्यादि । प्रत्यङ् । प्रत्यञ्चौ । प्रत्यञ्चः । प्र-त्यञ्चम् । प्रत्यञ्चौ । प्रतीचः । प्रतीचा । प्रत्यग्भ्यामित्यादि ।

विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये ॥ ६।३।९२ ॥

[१]-परतः केचिदिच्छन्ति केचिदिच्छन्ति पूर्वतः । उभयोः केचिदि-च्छन्ति केचिन्नेच्छन्ति चोभयोः ॥

अनयोः सर्वनाम्नश्च टेरद्र्यादेशोऽप्रत्ययान्तेऽञ्चतौ परे । अमुमुइअच् इति स्थिते यणादेशः । अमुमुयङ् । अमुमुयञ्चौ । अमुमुयञ्चः । शसादौ मुभावस्यासिद्धत्वान्न सन्धिः । अमुमुईचः । अमुमुईचा । अमुमुयग्भ्याम् । एवम्, अदमुयङ् । अमुद्र्यङ् । अदद्र्यङ् । उदङ् । उदञ्चौ । उदञ्चः । उदञ्चम् । उदञ्चौ । शसादावचि-

उद ईत् ॥ ६ । ४ । १३९ ॥

उच्छब्दात्परस्य नलोपिनो भस्याञ्चतेरस्य ईत् । उदीचः । उदीचा । उदग्भ्याम् ।

समः समि ॥ ६ । ३ । ९३ ॥

अप्रत्ययान्तेऽञ्चतौ ।

सम्यङ् । समीचः । समीचा । सम्यग्भ्याम् । तिरस् अञ्च् इतिस्थिते ।

तिरसस्तिर्यलोपे ॥ ६ । ३ । ९४ ॥

अलुप्ताकारेऽञ्चतौ परे तिरसस्तिर्यादेशः । तिर्यङ् । तिर्यञ्चौ । तिर्यञ्चः । अकारलोपः । श्चुत्त्वम् । तिरश्चः । तिरश्चा । तिर्यग्भ्यामित्यादि । प्राञ्च्इतिस्थिते ।

नाञ्चेः पूजायाम् ॥ ६ । ४ । ३० ॥

पूजार्थस्याञ्चतेरुपधाया नस्य लोपो न । अलुप्तनकारत्वान्न नुम् । प्राङ् । प्राञ्चौ । प्राञ्चः । नलोपाभावादलोपो न । प्राञ्चः । प्राञ्चा । संयोगान्तस्य लोपः । कुत्वेन ङकारः । प्राङ्भ्याम् ।

भाङ्भिः । ङ्णोः कुक्टुक्शरीति वा कुक् । भाङ्क्षु । एवं-प्रत्यङ्ङादयः । क्रुङ् । क्रुञ्चौ । क्रुञ्चः । क्रुङ्भ्यामित्यादि । चोः कुः । पयोमुक् । पयोमुग् । पयोमुचौ । पयोमुचः । व्रश्चेति-षत्वम् । स्कोः संयोगेति सुलोपः । जश्त्वचर्त्वे । सुवृट् । सुवृड् । सुवृश्चौ । सुवृश्च इत्यादि । उगित्वान्नुम् । सान्तमहतः संयोगस्य । महान् । हेमहन् । महान्तौ । महान्तः । महान्तम् । महान्तौ । महतः । महता । महद्भ्यामित्यादि । अत्यन्तत्वाभावान्न दीर्घः भवन् । भवन्तौ । भवन्तः । शेषं महद्वत् । अत्वन्तत्वाद्दीर्घः । धीमान् । शेषं भवद्वत् ।

उभे अभ्यस्तम् ॥ ६ । १ । ५ ॥

अत्र प्रकरणे ये द्वे विहिते ते उभे समुदिते अभ्यस्त संज्ञे स्तः ।

नाभ्यस्ताच्छतुः ॥ ७ । १ । ७८ ॥

अभ्यस्तात्परस्य शतुर्नुम् न । ददत् । ददतौ । ददतः । इत्यादि ।

जक्षित्यादयः षट् ॥ ६ । १ । ६ ॥

षड्धातवोऽन्ये जक्षितिश्च सप्तम एतेऽभ्यस्तसंज्ञाः स्युः ।

---

[१]—अत्रभवत्तत्रभवच्छब्दौ पूज्यार्थौ धीमद्वत् । अत्रभवान् । अत्रभवन्तो भट्टाचार्य्याः । तत्रभवान् । तत्रभवन्तः । (विभाषाभवदितिरुत्वमवस्यौकारो वा) हे भोः । हे भवन् । हे भगोः । हे भगवन् । हे अघोः । हे अघवन् । शेषं धीमद्वत् ।

जक्षत् । जक्षतौ । जक्षतः । इत्यादि । एवं जाग्रत् । दरिद्रत् । शासत् । चकासत् । दीध्यत् । वेव्यत् । धर्मगुप् । धर्मगुब् । धर्मगुपौ । धर्मगुपः । धर्मगुपा । इत्यादि ।

त्यदादिषु दृशोऽनालोचने कञ्च ॥ ३ । २ । ६० ॥

त्यदादिषूपपदेषु अनालोचनार्थाद् दृशेर्धातोः कञ् चात्क्विन् । क्विन्नन्तत्वात्कुत्वम् । तादृक् । तादृग् । तादृशौ । तादृशः । एवं यादृगादयः । (समानान्ययोश्च वक्तव्यम्) इतिक्विन् । सदृक् । सदृग् । सदृशौ । सदृशः । अन्यादृक् । ग् । अन्यादृशौ । अन्यादृशः । व्रश्चेति षत्वम् । जश्त्वचर्त्वे । विट् । विड् । विशौ । विशः । विड्भ्यामित्यादि ।

नशेर्वा ॥ ८ । २ । ६३ ॥

नशेः कवर्गोऽन्तादेशो वा पदान्ते । झल्यपीति केचित् । नक् । नग् । नट् । नड् । नशौ । नग्भ्याम् । नड्भ्याम् । श्वेतवाहादित्वाड्डस् । पुरोडाः । पुरोडाशौ । हे पुरोडाः । पुरोडोभ्याम् ।

स्पृशोऽनुदके क्विन् ॥ ३ । २ । ५८ ॥

अनुदके सुप्युपपदे स्पृशेः क्विन् । घृतस्पृक् । घृतस्पृग् । घृतस्पृशौ । घृतस्पृशः । अनुदके किम् । उदकस्पर्शः क्विन्प्रत्ययो यस्माद्विहितस्तस्मादन्यत्रापि प्रत्यये पदान्तस्य कुत्वम् । स्पृक् । स्पृग् । स्पृशौ । स्पृग्भ्याम् । दधृक् । दधृग् । दधृषौ । दधृग्भ्याम् । रत्नमुट् । रत्नमुड् । रत्नमुषौ । रत्नमुड्-

भ्याम् । षड्भ्योलुक् । षट् । षड् । षड्भिः । षड्भ्यः । षण्णाम् । षट्सु । षट्त्सु ।

वोरुपधाया दीर्घ इकः ॥ ८ । २ । ७६ ॥

रेफवकारान्तस्य धातोरुपधाया इको दीर्घः पदान्ते । पिपठीः। पिपठिषौ। पिपठीर्भ्याम्। "वाशरी" ति वा विसर्जनीयः।

नुम्विसर्जनीयशर्व्यवायेऽपि ॥ ८ । ३ । ५८ ॥

एभिः प्रत्येकं व्यवधानेऽपीण्कुभ्यां परस्य सस्य मूर्द्धन्यादेशः। पिपठिष्षु। ष्टुत्वेन षः। विसर्जनीय पक्षे । पिपठीःषु। रात्सस्येति सलोपः। चिकीः । चिकीर्षौ । चिकीर्षः । चिकीर्भ्याम् । चिकीर्षु। दोः। दोषौ। दोषः। दोषम्। दोषौ । "पद्दन" इति वा दोषन्नादेशः। दोष्णः। दोषः। दोष्णा। दोषा। दोषभ्याम्। दोर्भ्याम्। दोष्षु। दोःषु। स्कोरिति कलोपं प्रति कुत्वस्यासिद्धत्वात्संयोगान्तस्य लोपः। विविट्। विविड्। विविक्षौ। विविक्षः। विविड्भ्यामित्यादि। विविट्सु। स्कोरिति कलोपः। तट्। तड्। तक्षौ। तक्षः। तट्सु। गोरट्। गोरड्। गोरक्षौ। गोरक्षः। रक्षतेः संयोगान्तस्य लोप इत्येके। गोरक्। गोरग्। गोरक्षौ। स्कोरिति कलोपं प्रति कुत्वस्यासिद्धत्वात्संयोगान्तस्य लोपः। पिपक्। पिपग्। पिपक्षौ। पिपक्षः। पिपग्भ्याम्।

[१]—तदन्तग्रहणात्परमषट् । परमषण्णाम्। गौणत्वे नियषषाम्। रुत्वं प्रति षत्वस्यासिद्धत्वात्ससजुषोरिति रुत्वम् ।

पिपक्षु । एवं विवक् । दिधक् । रुत्वम् । उपधादीर्घः । सुपीः । सुपिसौ । सुपीष्षु । सुपीःषु (१) । एवंसुतूः । विद्वान् । हे विद्वन् । विद्वांसौ । विद्वांसः । विद्वांसम् । विद्वांसौ ।

वसोः सम्प्रसारणम् ॥ ६ । १ । १३१ ॥

वस्वन्तस्य भस्य सम्प्रसारणम् । पूर्वरूपम् । षत्वम् । विदुषः । विदुषा । वसुस्रंसुध्वंस्वनडुहां दः । विद्वद्भ्यामित्यादि । पेचिवान् । पेचिवांसौ । वस्येकाजाद्घसामिति । पेचुषः । पेचुषा । पेचिवद्भ्याम् । जगन्वान् । जगन्वांसौ । वस्यत्वे तन्निमित्तकं नत्वं न ।

गमहनजनखनघसां लोपः क्ङित्यनङि ॥६।४।९८॥

एषामुपधाया लोपोऽजादौ क्ङिति नत्वाङि । जग्मुषः । जग्मुषा । जगन्वद्भ्याम् एवं जघन्वान् । जघ्नुषः । जघन्वद्भ्याम् । इत्यादि । सुष्ठु हिनस्तीति सुहिन् (२) । सुहिंसौ । सुहिन्भ्याम् । ध्वत् । ध्वसौ । ध्वसः । ध्वद्भ्याम् । एवं स्रत् । उक्थशाः । उक्थशासः । हे उक्थशः । उक्थशोभ्याम् ॥ इत्यादि ।

पुंसोऽसुङ् ॥ ७ । १ । ८९ ॥

पुंसोऽन्तस्याऽसुङ् सुटि । उगावितौ । पुमान् । हे पुमन् । पुमांसौ । पुमांसः । पुमांसम् । पुमांसौ । पुंसः । पुंसा । पुंभ्यामि-

[१]-सुष्ठु पेसति, तोसतीति च विग्रहः । भौवादिकाविमौ ।
[२]-सान्तमहतइतिमहच्छब्दसाहचर्यात् सान्तधातोर्न दीर्घः । सुहिन् ।

स्यादि । ऋदुशनेति, अनङ् । उशना । (उशनसः सम्बुद्धौ वाऽनङ् नलोपश्च वा वाच्यः) हेउशनः । हेउशनन् । हे उशन । उशनसौ । उशनोभ्याम् । अनेहा । हेअनेहः । हेअनेहसौ । एवं पुरुदंशा । वेधाः । हे वेधः । वेधसावित्यादि । अत्वसन्तस्येत्युक्तेर्न दीर्घः । सुष्ठुवस्ते,सुवः । सुवसौ । सुवोभ्याम् । सुवस्सु । सुवःसु । पिण्डं ग्रसतीति पिण्डग्रः । पिण्डग्रसौ ।

अदस औ सुलोपश्च ॥ ७ । २ । १०७ ॥

अदस औकारोऽन्तादेशः सौ सुलोपश्च । तदोः सः साविति दस्य सः । असौ । (औत्वप्रतिषेधः साकच्काद्वा वक्तव्यः सादुत्वञ्च) यदौत्वाभावस्तदा सात्परस्य उत्वम् । असकौ । असुकः । सदाद्यत्वम् । पररूपत्वम् । वृद्धिः ।

अदसोऽसेर्दादु दो मः ॥ ८ । २ । ८० ॥

अदसोऽसान्तस्य दात्परस्य उवर्णौ दस्य च मः । स्थानेऽन्तरतम इति ह्रस्वव्यञ्जनयोर्ह्रस्वः । दीर्घस्य दीर्घ ऊकारः । अमू । जसः शीभावः । आद्गुणः ।

एत ईद् बहुवचने ॥ ८ । २ । ८१ ॥

अदसो दात्परस्यैत ईत् स्याद्दस्य च मो बह्वर्थोक्तौ । अमी । पूर्वत्रासिद्धन्यायेन विभक्तिकार्यम्प्राक् पश्चादुत्वमत्वे । अमुम् । अमू । अमून् । उत्वे मत्वे च कृते घिसंज्ञायां नाभावः ।

[१]–प्रतिषेधसन्नियोगशिष्टत्वात्तदभावे नौत्वम् ।

न मु ने ॥ ८।२।३ ॥

नाभावे कर्तव्ये कृते च मुभावो नासिद्धः । अमुना । अमूभ्याम् । नेदमदसोरकोः । अमीभिः । अमुष्य । अमुयोः । अमीषाम् । अमुष्मिन् । अमुयोः । अमीषु ॥

इति हलन्ताः पुँल्लिङ्गाः ॥

अथ हलन्तस्त्रीलिङ्गाः ।

हत्वे प्राप्ते,

नहो धः ॥ ८।२।३४ ॥

नहो हस्य धो झलि पदान्ते च । उपानत् । उपानद् । उपानहौ । उपानहः । उपानद्भ्यामित्यादि । क्विन्नन्तत्वात्कुत्वम् । उष्णिक् । उष्णिग् । उष्णिहौ । उष्णिहः । उष्णिग्भ्यामित्यादि । दिव औत् । द्यौः । दिवौ । दिवः । दिवम् । दिवौ । दिवउत् । द्युभ्यामित्यादि । गीः । गिरौ । गिरः । एवं पूः । चतुरश्चतसादेशः । स्वस्रादित्वान्न ङीप् । चतस्रः २ । चतसृभिः । चतसृभ्यः २ । चतसृणाम् । चतसृषु । किमः कादेशे टाप् । का । के । काः । इत्यादि सर्वावत् ।

यः सौ ॥ ७।२।११० ॥

[१]-उवर्ण एव स्वरे, दिवउदिति केचित् । यूर्णुतु । अन्यत्र द्वितीयः ॥

इदमो दस्य यः सौ । इदमोऽमः । इयम् । सदाद्यत्वं, टाप् , दश्चेतिमः । इमे । इमाः । इमाम् । इमे । इमाः । अनादेशः । अनया । हलि लोपः । आभ्याम् । आभिः । अस्यै । आभ्याम् । आभ्यः । अस्याः । आभ्याम् । आभ्यः । अस्याः । अनयोः । आसाम् । अस्याम् । अनयोः । आसु । अन्वादेशे तु । एनाम् । एने । एनाः । एनया । एनयोः२ । स्रक् । स्रग् । स्रजौ । स्रग्भ्यामित्यादि । सदाद्यत्वम् । टाप् । स्या । से । साः । इत्यादि सर्वावत् । एवं तद् यद् एतद् । वाक् । वाग् । वाचौ । वाचः । वाग्भ्याम् । अप्शब्दो नित्यं बहुवचनान्तः । अप्तृन्निति दीर्घः । आपः । अपः ।

अपो भि ॥ ७ । ४ । ४८ ॥

अपस्तकारो भादौ प्रत्यये । अद्भिः । अद्भ्यः । अपाम् । अप्सु । वा०— स्ववःस्वतवसोर्मास उषसश्च त इष्यते । (भादौ प्रत्यये) स्ववद्भिः । स्वतवद्भिः । माद्भिः । उषद्भिरित्यादि । दिक् । दिग् । दिशौ । दिशः । दिग्भ्याम् । एवं दृक् । "किन्प्रत्ययस्य" सत्र प्रत्ययग्रहणादन्यत्रापि कुत्वमित्युक्तम् । तादृक् । तादृशौ । वेदे तु "हकृस्ववःस्वतवसां छन्दसि" ७।१।८३। इति सौ नुम् । तादृङित्यादि । त्विट् । त्विड् । त्विषौ । त्विषः । त्विड्भ्याम् । सजूः । सजुषौ । सजूर्भ्यामित्यादि । एवमाशिष् । असौ । सदाद्यत्वम् । टाप् । औङः शी । उत्वमत्वे । अमू । अमूः । अमुया । अमूभ्याम् ।

अमूभिः । अमुष्यै । अमूभ्याम् । अमूभ्यः । अमुष्याः । अमुयोः । अमूषाम् । अमुष्याम् । अमुयोः । अमूषु ॥

इति हलन्ताः स्त्रीलिङ्गाः ॥

अथ हलन्त नपुंसकलिङ्गाः ॥

स्वमोर्लुक् । दत्वम् । स्वनडुत् । द् । स्वनडुही । चतुरनडुहोरित्याम् । स्वनड्वांहि । पुनस्तद्वत् । शेषे पुंवत् । वाः । वारी । अझलन्तत्वान्नुम् । वारि । चत्वारि । नलुमतेति कादेशो न । किम् । के । कानि । इदम् । इमे । इमानि । (अन्वादेशे नपुंसकैकवचने एनदिति वाच्यम्) एनत् । एने । एनानि । (सम्बुद्धौ वा नपुंसकानां नलोपो वाच्यः) हे ब्रह्मन् । हे ब्रह्म । ब्रह्मणी । ब्रह्माणि ।

अहन् ॥ ८ । २ । ६८ ॥

अहन्नित्यस्य रुः पदान्ते । रुत्वस्यासिद्धत्वेन नलोपे प्राप्ते- (अह्नो नलोपप्रतिषेधो वक्तव्यः) अहः । विभाषा ङिश्योः । अह्नी । अहनी । अहानि । हे अहः । अहोभ्याम् । दण्डि । दण्डिनी ।

इन्हन्पूषार्य्यम्णां शौ ॥ ६ । ४ । १२ ॥

एषामङ्गानामुपधाया दीर्घः शावेव । दण्डीनि । बहुवृत्र-

हाणि । बहुपूषाणि । बह्वर्यमाणि । असृक् । असृग् । असृजी । असृञ्जि । पद्दन्निति वा असन् । असृञ्जि । असानि । असृजा । अस्ना । असृग्भ्याम् । रात्सस्येति नियमान्न संयोगान्तलोपः । ऊर्क् । ऊर्ग् । ऊर्जी । ऊर्ज्जः शौ नुम्वेति केचित् । ऊर्न्जि । ऊर्जि । (बहूर्ज्जिनुम्प्रतिषेधः) बहूर्ज्जि कुलानि । अन्त्यात्पूर्वं नुममिच्छन्त्येके । बहूर्न्जि । सव । से । सानि । तव । ते । तानि । एवं यत् एतद् । अन्वादेशे एनद् । गामञ्चतीतिगवाक् । असञ्ज्ञायामकारलोपः । गोची । गवाञ्चि । तिर्य्यक् । तिरश्ची । तिर्य्यञ्चि । एवं प्राक्प्रसगादयः । यकृद् । यकृती । यकृन्ति । पद्दन्निति वा यकन् । यकानि । यकृता । यक्ना । यकृद्भ्याम् । शकृत् । शकृती । शकृन्ति । शकानि । शकृता । शक्ना । शकृद्भ्याम् । शकभ्याम् । ददत् । ददती ।

वा नपुंसकस्य ॥ ७ । १ । ७९ ॥

---

(१)—असृजः पदान्ते कुत्वं सृजेः क्विनो विधानात् । विश्वसृडादौ प्रतिविधेयम् ।

(२)—अत्र तरजानां संयोगस्तेन चुत्वम् ।

(३)—गवाकशब्दस्य रूपाणि क्लीबेऽर्चागतिभेदतः । असन्ध्यवप्लुपूर्व-रूपैर्नवाधिकशतं मतम् ॥ १ ॥

स्वम्सुप्सु नव षड् भादौ षट्के स्युर्श्त्राणि जश्शसोः । चत्वारि शेषे दशके रूपाणीति विभावय ॥ २ ॥

अभ्यस्तात्परोयः शता तदन्तस्य ङीबस्य शतुर्नुम्वा सर्वनामस्थाने । ददन्ति । ददति । एवं जक्षजूजाग्रदादयः । तुदत् ।

आच्छीनद्योर्नुम् ॥ ७ । १ । ८० ॥

अवर्णान्तादङ्गात्परो यश्शतुरवयवस्तदन्तस्याङ्गस्य नुम्वा शीनद्योः परयोः । तुदन्ती । तुदती । तुदन्ति । भात् । भान्ती । भाती । भान्ति । पचत् ।

शप्श्यनोर्नित्यम् ॥ ७ । १ । ८१ ॥

शप्श्यनोरात्परो यः शतुरवयवस्तदन्तस्य नित्यं नुम् शीनद्योः । पचन्ती । पचन्ति । दीव्यत् । दिव्यन्ती । दीव्यन्ति । स्वप् । स्वपी । अप्तृन्निति दीर्घः । स्वाम्पि । स्वपा । स्वद्भ्याम् । रुत्वम् । धनुः । धनुषी । सान्तमहत इतिदीर्घः । नुम्विसर्जनीयेति षत्वम् । धनूंषि । धनुषा । धनुर्भ्याम् । धनुर्भिः । एवं हविः । पयः । पयसी । पयांसि । पयसा । पयोभ्याम् । अदः । विभक्तिकार्य्यम् । उत्वमत्वे । अमू । अमूनि । शेषं पुंवत् ।

इति हलन्ता नपुंसकलिङ्गाः ॥

वैदिकशब्दोपयोगी साधारणः, परिशिष्टोभागः

—— —:-o-:——

सुपां सुलुक्पूर्वसवर्णाऽऽच्छेयाडाड्यायाजालः ॥ ७ । १ । ३९ ॥

ऋजवः सन्तु पन्थाः । पन्थान इति प्राप्ते सुः । परमे व्योमन् । व्योमनि इति प्राप्ते ङेर्लुक् । धीती, मती, सुष्टुती । धीत्या मत्या सुष्टुत्येति प्राप्ते पूर्वसवर्णदीर्घः । या सुरथा रथीतमोभा देवा दिविस्पृशा । अश्विना । यौ सुरथौ दिविस्पृशावित्यादौ प्राप्ते आ । नताद्ब्राह्मणम् । नतमिति प्राप्ते आत् । या देव विद्मता त्वा । यमिति प्राप्ते । न युष्मे वाजबन्धवः । अस्मे इन्द्राबृहस्पती । युष्मासु अस्मभ्यमिति प्राप्ते शे । उरुया धृष्णुया । उरुणा धृष्णुनेति प्राप्ते या । नाभा पृथिव्याः । नाभाविति प्राप्ते डा । ता अनुष्ठ्योच्यावयताव । अनुष्ठानमनुष्ठा । व्यवस्थावदङ्आङो ड्या । साधुया । साध्विति प्राप्ते याच् । वसन्ता यजेत । वसन्ते इति प्राप्ते आल् । वा०— इयाडियाजीकाराणामुपसंख्यानम् । उर्विया । दार्विया । उरुणा दारुणेति प्राप्ते इया । सुक्षेत्रिया । सुक्षेत्रिणेति प्राप्ते डियाच् । दृतिं न शुष्कं सरसी शयानम् । ङेरीकार इत्याहुः । तत्राद्युदात्ते पदे प्राप्ते व्यत्ययेनान्तोदात्तता । वस्तुतस्तु ङीपन्तात् ङेर्लुक् । ईकारादेशस्य तूदाहरणान्तरं मृग्यम् । वा०—आङयाजयारामुपसंख्यानम् । प्र बाहवा सिसृतम् । बाहुनेति प्राप्ते आङादेशः । घेर्ङितीति गुणः । स्वप्नया । स्वप्नेनेति प्राप्ते अयाच् । स नः सिन्धुमिव नावया । नावेति प्राप्ते अयार् । रित्स्वरः । ॥ इति नामिकः समाप्तः ॥